the numbers commencing from 2 exist, being dependent upon enumerative cognition (*apekṣābuddhi*), their non-apprehension is due to the non-apprehension of the correlative (*pratiyogin*) and the cessation of the desire to know. Therefore, it is only on the admission that consciousness proceeds by way of the senses and establishes a contact with objects that the dependence of *prakāśa* on the presence or absence of this contact could be rendered intelligible.

Indeed, on your view, consciousness is the entity which manifests the object. All manifesting entities, such as, the light issuing from the lamp are found to manifest objects only by getting into contact with the objects to be illumined. Therefore, it is right to admit that consciousness also is of such a nature (i.e. it manifests objects only by getting into contact with them).

If it be objected that a formless object like ether cannot be endowed with activity (in other words, if it is said that consciousness, being formless, cannot enter on the activity of proceeding and getting into contact), (it may be asked) what exactly is meant by 'form' when it is said that the substance wherein it is absent is devoid of activity. If the reply is that it is a technical term standing for that which, while being a substance occupies a limited area, (we say) the attribution of such a form to consciousness is acceptable to us. In fact, consciousness is not an all-pervasive substance. If it were so (i.e. all-pervasive), there would be the manifestation of all things simultaneously. But, on the view that it pervades a limited area, when it is in contact with one sense-organ and directed to the object falling within the range of that sense, it does not (at the same time) permeate another sense-organ. That is why different kinds of sensory knowledge do not originate simul-

निरतिशयवेगं च तत्; युगपदिवातिशीघ्रमनेकेन्द्रियाधिष्ठानदर्शनात्। अतो यथोदितं मूर्तत्वं सिद्धम्।

स्पर्शवत्ता मूर्तिः, तद्विरहान्निष्क्रियत्वमिति चेत्, शब्देनानेकान्तः। स खलु शङ्खमुखादेर्दवीयसोऽपि देशान्नोदनविशेषेण लोष्टादिरिव यावद्वेगं प्रतिष्ठते स्पर्शविहीनोऽपि। स्पर्शरहितस्यापि मनइन्द्रियस्य क्रियावत्त्वं पदार्थवाक्यार्थविदामुभयेषामपि सम्मतमेव।

कथमतीतानागतयोरसतोश्चैतन्येन सम्प्रयोग इति चेत्, कथं वा विषयभावः? प्रकाशमानत्वं सङ्ख्यादियोगो वा यस्तत्र निर्वाहस्स एवात्रास्तु।

taneously. Consciousness moves with exceeding quickness;[186] for its rapid permeation of the different senses (one after another) is perceived as if it were simultaneous. Therefore, it is to be concluded that the character of possessing a form, in the sense described above belongs to consciousness.

If it is urged that form (*mūrti*) is the quality of possessing touch, and that consciousness, being devoid of such a form, cannot posses any activity, (the reply is) this argument is liable to be charged with *anekānta doṣa,* in view of the instance of sound (*śabda*). For the sound emanating from the conch, the mouth and the like, though devoid of touch, proceeds, like a missile, with extreme rapidity to places far distant from its source by piercing through space. The fact that manas, though devoid of touch, is endowed with activity is admitted both by the Naiyāyikas who have understood the categories (*padārthas*) and by the Mīmāmsakas who have inquired into the import of propositions.

How (it may be asked) can objects, past and future, which are non-existent, come into contact with consciousness? (We ask you in turn) how do they become the objects (*viṣaya*) of knowledge? The same explanations that you offer with regard to these[187]—such as (their becoming the object of knowledge means just this:) their becoming mani-

---

186. Compare the definition of jñāna:—'atyantavegitātyanta śaukṣmyam nirbaratātathā tathā . . . . .'—given Prathamādhikaraṇa of the *Nyāyatattva* and quoted in the *Nyāyasiddhāñjana,* Buddhiparicheda. Vide *infra* p. 95 and note 150.

187. Vedānta Deśika quotes these passages and discusses them in the *Nyāyasiddhāñjana.* Rangarāmānujaswāmi also comments on them. They identify the first (i.e., the view that objects, past and future, become the object of jñāna) as the view of the Naiyāyikas, and the second (i.e. the view that these objects possess prākaṭya) as that of the Bhāṭṭas. See Buddhipariccheda, p. 266.

NYAYAKULISA

Edited with Introduction and Notes

By

R. Ramanujachari

And

K. Srinivasachari

श्रीः

न्यायकुलिशे षष्ठो वादः ।

आमुष्मिकाणामर्थानां चतुर्णामपि सिद्धये ।
देहादिभ्यो विभिन्नत्वमात्मनः प्रतिपाद्यते ॥

तत्रेन्द्रियादीनां देहव्यतिरिक्तानामनात्मत्वं सुप्रतिपादमिति न तत्रातीव प्रयतितव्यम् । तथा हि—अहम्प्रत्ययसामानाधिकरण्यमात्माविवेकमूलम् । तन्न तावदिन्द्रियेषु दृश्यते । न हि कश्चिच्चक्षुरहं श्रोत्रमहमिति वा प्रत्येति । देहेऽपि समानमिति चेन्न ; देवोऽहं मनुष्योऽहमिति सामानाधिकरण्यदर्शनात् । देवमनुष्यादेः शब्दस्य च नेन्द्रियादिवाचित्वम् ; देवस्य चक्षुर्मनुष्यस्य चक्षुरिति व्यतिरेकनिर्देशात् । देवस्य देह इत्यपि निर्देशो दृश्यत इति चेन्न ; देहापेक्षायामौपचारिकत्वात् , आत्मापेक्षायां वा निष्कर्षकत्वात् नीलस्य पटस्य गुण इतिवत् । चक्षुरादयोऽपि सन्तु निष्कर्षकाः, व्यतिरेको[1] वा तेषामौपचारिक इति चेन्न ; चक्षुश्श्रोत्रादीनां सर्वेषां तथात्वे पर्यायत्वप्रसङ्गात् कायदेहादिवत् । नानासामानाधिकरण्यात्तत्तन्निष्कर्षकनानाशब्दा······[न्वितदेवादिशब्दार्थस्य] एकत्वे तस्य पूर्वपूर्वानुपमर्देन प्रतीयमाननानात्मत्व(?)सामानाधिकरण्यानुपपत्तेः । नानात्वे चात्मनां प्रत्ये······[कानुभूतप्रतिसन्धाना] भावप्रसङ्गात् , न देवादिशब्दाः श्रोत्रादिषु भेदेनैव प्रथमानेऽप्येकस्यैव व्युत्पत्त्या साधारणा वर्तितुमर्हन्ति । न च तेषामिन्द्रियत्वमेकं रूपमर्थ इति वाच्यम् ; मनुष्यपिण्डादिशब्दानां पर्यायत्वप्रसङ्गात्[2]; तेष्विन्द्रियाणां भेदाप्रतिपत्तेः देहभेदस्यैव तत्र प्रतीतेः । इन्द्रियाणाञ्चाहमर्थत्वे प्रतिनियतविषयत्वेन तेषां मिथःप्रतिसन्धानानुप-

१. देवस्य चक्षुरित्येवं व्यतिरेकनिर्देश इत्यर्थः ।

२. देवस्य चक्षुरित्यादिवत् मनुष्यस्य चक्षुरित्यादिप्रयोगाद्देवशब्दस्येव मनुष्यादिशब्दस्यापीन्द्रियवाचित्वात्पर्यायत्वप्रसङ्गः । न च तस्य तस्य विभिन्नेन्द्रियवाचित्वादपर्यायत्वम् ; तत्र तत्र देहभेदेऽपि इन्द्रियभेदाभावादिति ।

पत्तिः । मनस्तु प्रतिसन्धत्तामिति चेन्न; तस्य का (क?) रणत्वात् । व्यासङ्गयुक्ते(:?) स्मृतिकरणत्वेन वा सिद्धत्व(त्वाद ?) स्य कर्तृत्वायोगात् । अतः किमत्र विस्तरेण ?

अस्तु इन्द्रियातिरिक्तोऽहमर्थः, प्राणस्तु स्यात्; स खल्वेक एव वृत्तिभेदाद्भिद्यत-इति चेन्न; तस्यापि देवादिशब्दगोचरत्वात्[1] । देहवैजात्ये वैजात्यानुपलम्भेन प्रतिनियत-शब्दगोचरत्वाभावात्[2] । निष्क्रिये शरीरे सक्रिये प्राणेऽहमर्थस्य निष्क्रियत्वप्रतीतेश्च । बुद्धिस्तु बा (सा ?) ध्यत्वेन प्रतीयत इति साहसम्[3] । आश्रयाश्रय(यि ?) त्वरूपकर्तृत्वक्रि-यात्वयोरेकत्वा (त्रा ?) नुपपत्तेः । ततो द्वितीयापि बुद्धिरित्यवशिष्यते । न च सा सवि-षया; गोचरान्तराप्रतीतेः । अप्रतीतस्य च विषयत्वकल्पनानुपपत्तेः । निर्विषयाया बुद्धित्वं स्वयंप्रकाशत्वमेव । तत्तु सिद्धान्ती वक्ष्यति । तस्मादिन्द्रियमनःप्राणबुद्धीनाम-नात्मत्वे सिद्धे देह एवात्मेति युक्तम् ।

अत्राह परः कश्चित्—अस्ति तस्यैवाहमिति प्रतीतेः (तिः ?) । न हि स्थूलोऽहं कृशोऽहमित्यत्रार्थान्तरमहमाद्याकारस्सम्भवति; मम शरीरं स्थूलमिति व्यतिरेकदर्शनात् । तत्राहम्प्रत्ययो भ्रान्तिरिति चेत्; तर्हि ममात्मा वेत्तीति व्यतिरेकदर्शनादात्मनो वेदितुरप्य-र्थान्तरमहमर्थः किन्नेष्यते ? तत्रौपचारिको भ्रान्तिरेव न दृष्टत्वात्....[भ्रान्तिनिबन्धनो वा दृष्टत्वादसौ व्यतिरे] कनिर्देश इति चेत्, इहाप्येवमस्तु । नैवम्, वेदनानुपपत्तेरिति चेन्न; न हि दृष्टेऽनुपपन्नं नाम ।

उपपत्त्या शरीरस्य दृष्टचैतन्यवारणम् (णे ?) ।
अनुमानादनुष्णेषु पर्वं[4] (परं ?) (स्पर्शि?) तेन्द्र(तेज?)स्सुसिद्ध्यति[5] ॥

१. इन्द्रियात्मपक्षे तस्येव प्राणस्याप्यस्मिन् मते देवादिशब्दवाच्यत्वस्यावश्यकत्वादित्यर्थः ।

२. प्रतिनियतशब्दगोचरत्वायोगादित्यर्थः ।

३. बुद्धेस्साध्यात्मना ज्ञाधात्वर्थत्वेन प्रतीयमानतया तस्या आत्मत्ववचनं साहसमित्यर्थः ।

४. सर्पं० पा०

५. तेजस्युष्णस्पर्शमस्वीकृत्य तदाश्रयतया परमपि तत्र साध्येतेति भावः ।

देहो जानातीति नोपलभ्यत इति चेन्न; भेदासिद्धावात्मान्तरपर्यवसानस्यासिद्धेः अयं त्वात्मशब्दो देहवचन इत्येव पश्यतु भवान्। ज्ञानाधिकरणत्वाय चात्मान्तरान्वेषणम्; अस्यैव ज्ञातृत्वनिर्वाहे किमर्थान्तरगवेषणया ? भवत्सिद्धान्तवासनाविपर्यासविधुरा[1]: कतिचित्प्रामाणिकास्तु देहो जानातीत्यपि प्रतिपद्येरन्नेव। तथापि .... [पदार्था] न्तरेषु .... [भौतिकेषु] चैतन्यानुपलम्भादभावे सिद्धे कथं तज्जातीये देहे तत्स्वभाव इति चेत्; न तावदयं स्वभाववादिनो दोषः; सर्वस्य दर्शनादर्शनाभ्यामेव तथा तथा व्यवस्थापनादनुमानप्रचाराभावात्; व्यवहारस्य सम्भावनामात्रेणापि सिद्धेः। अत एव हि क्वचित्क्वचिद्व्यवहरमाणानां विसंवादसम्भवः। न हि व्यवस्थिते तदवकाशः।

भवतामपि यद्येषा व्याप्तिस्सिद्ध्येत्प्रमाणतः।
अदृष्टमपि काष्ठादौ चैतन्यं सूक्ष्ममिष्यताम्॥

शरीरेषु चैतन्योपलम्भात्, इतरत्रानुपलम्भेऽपि जातिभेदेनौषधिषु रूपरसादिविशेषवत्तत्रैव तदिति व्यवस्था युक्ता। गुणावान्तरजात्या रूपरसादिमात्रस्य सजातीयेष्व(षु ?) सिद्धस्यावान्तरभेदमात्रं तथा व्यवस्थापनमर्हतीति चेन्न; तथापि दर्शनानुगुण्येन देहचैतन्यसिद्ध्यर्थं भूतान्तरेषु सूक्ष्मचैतन्यं कल्प्यताम्। न तु तत्रादर्शनादृष्टबाधः। यद्येवं नेष्यते, कथं तर्हि पृथिव्यां रसादिस्समवेयात् ? पृथिव्येकदेशभूतशिलादिषु रसाद्यनुपलम्भादपृथिव्यात्मकाश्शर्करादयो भवेयुरायुष्मताम्। यदि च दर्शनानुसारेण शिलादिष्वपि तज्जातीयतया सूक्ष्मतत्तद्गुणसद्भावकल्पना, एवमिहापि।

न च गुणावान्तरजात्यां सजातीयेषु सिद्ध(द्धिः ?)दोषाय। एकभूतगुणेष्वेव सा व्याप्तिः। अनियमात्। चैतन्यं तु समुदायगुणः। न हि वैशेषिकवदेकाभूतारब्धं शरीरमभ्युपेमः। पाञ्चभौतिकं हि शरीरमुपलभामहे। न च तथा सति मृतशरीरेऽपि चैतन्यप्रसङ्गः; तस्य सङ्घातान्तरत्वात्। रक्तादिधातुवच्चैतन्यस्यापि तत्र नाशाभ्युपगमात्। अतो मदशक्तिवत्प्रत्येकादृष्टमपि समुदाये दृष्टमभ्युपगम्यताम्।

१. वासनाधीनविपरीतज्ञानरहिता इत्यर्थः।

स (न ?) च सङ्घातत्वादिना पारार्थ्यानुमानमचेतनत्वानुमानं वा ; कालात्ययापदेशात् । कथञ्चित्परार्थत्वमात्रेऽपि सिद्धसाधनत्वात्। न च देहस्य चेतनत्वे प्रतिसन्धानानुपपत्तिः बाल्युवाद्यवस्थाभेदेन भिन्नत्वादिति वाच्यम् ; एकत्वेनैव तत्रापि प्रत्यभिज्ञायमानत्वात् । एवमेव हि मीमांसकानामभ्युपगमः । अत एव मात्रानुभूतस्य पुत्रेण स्मरणप्रसङ्गोऽप्युपकार नियमः(म्यः ?) तयोरेकत्वाभावात् । एकवस्य(त्र?) च तस्यानपायात् । तस्माद्य (त्किञ्चित्प्र-देशा ?) पायेऽपि तत्तत्प्रवे(दे ?)शानुभूतस्मरणोपपत्तिः ; यतः शिरःपादादिदेशभेदेन सुख-दुःखानुभवेऽप्यवयविनस्तत्र तत्र व्याप्त्या तत्समवायाविरोधः ॥

न च देहस्य जन्मान्तरदृष्टस्मरणानुपपत्त्या प्रथमप्रवृत्त्यसिद्धावुत्तरोत्तरसर्वव्यवहार-विलयश्शङ्कनीयः ; तत्तत्सुखदुःखानुभवसमनन्तरजनितयादृच्छिकप्रवृत्तिविशेषेष्वन्वयव्यति-रेकाभ्यां हेतुसाद्धया(द्ध्य ?)भावावगमपूर्वकं सर्वव्यवहारोपपत्तेः । न हि निपुणावलोकित-समस्ततत्त्वाद्याश्च तीव्रदुःखानुभवे तत्परिहारौपयिकमेव देहव्यापारमातन्वते ; किं पुनर्बालाः । अत एव केषाञ्चित् स्तन्यपानादिव्यापारासन्निपाते विपत्तिर्भवति । प्रायेण च स्वरसवाहिप्राणादियोगवशेन शरीरचेष्टाः स्वाभाविक्यस्तथा तथा दृश्यन्ते । बुद्धितीव्रत्वादि-योगविशेषोऽपि स्वभावभेदादेवोपपद्यते । स्वसामग्रीसमवधानञ्च सहकार्युपनायकसामग्र्यन्तरा-धीनम् । तदपि तथेति नादृष्टतत्समवायिकल्पना(वि?)कल्पनावकाशः । अतश्शरीरस्यैव प्रत्येमुः प्रत्येतव्यादव्यतिरेकात् प्रमितिव(द?)शाया महमिति भासमानस्यात्मत्वं नार्थन्तरस्येति युक्तं पश्यामः ॥

अत्रोच्यते—

पाणी पादौ च नाहं न च भवति सुखं तेषु मय्येवं[1] दृष्टं
प्रत्येकं चेतनाश्चेत्करतदवयवा नैकतन्त्रा भवेयुः ।

१. मय्येव—अहमर्थ एव

तत्रात्मत्वं न सिद्धयेदवयविनि नतद्भेदमभ्येति तेभ्यः
देवादौ प्रत्यवस्ता स्मृ (प्रत्यवस्थं म ?) तिरपि[1] न भवेदेकदेशानुषङ्गात् ॥

अहंप्रत्ययगोचरो ज्ञाता, स एवात्मेत्यत्र तावद्भवतामविवाद एव । तत्र (न ता ?) तावत् देहावयवाश्चेतयन्ते, तेषामहमिति भानाभावात् । न हि कश्चिदहं पाणिः अहं पाद इति वा प्रतिपद्यते , ततोऽहंत्वाभावात्तेषु ज्ञानाभावः ।

[2]शिरःपादादिषु सुखदुःखे समवेतः, पादे मे सुखं, शिरसि मे सुखमित्युपलम्भात् । अतस्तत्समानाधिकरणं तदात्मकं वा ज्ञानमपि तत्रैवेत्युचितम् । नैतद्युक्तम् ; यतस्तत्रास्मदर्थस्य सुखसमवायित्वम् । नह्यस्मदर्थमपहायान्यसमवेतं सुखमध्यक्षमनुभूयत इति कस्य चिद्भ्रान्तिरपास्ता भवति। अतो 'मे सुखम्' इति समवायिनि सिद्धे, बहुप्रदेशत्वात्तस्य, कुत्रेत्याकांक्षायामुपलक्षणतया पादादिव्यपदेश इति । अत्रास्मन्मते अणुरेवात्मा सुखमप्यनुकूलवेदनात्मकं तस्मिन्नेव स्थितमपि तत्तदनुकूलस्पर्शादिविषयदेश···[सम्बन्धिप्रदेश] विशेषितं तथानुभूयते । अत एव हि गीतादिसुखं न श्रोत्रादिस्थमुपलभ्यते, शब्दस्य तद्देशतयानुपलम्भात् । यदि ह्यस्मदर्थः पादादिरेव स्यात्, वैयधिकरण्यमेव न स्यात् । अतोऽवयवेषु सुखासमवायात् तन्मुखेनापि चैतन्यसमवायो दुरुपपादः ॥

अपि चावयवाश्चेत्प्रत्येकं चेतयन्ते, ततस्स्वार्था एव भवेयुः। न हि चेतनस्स्वप्रयोजनमपहायार्थान्तरे प्रयतते । अतः स्वप्रयोजनापेक्षिष्वितरपराङ्मुखेषु मिथस्साभ्यसूयेषु च हस्तपादादिष्ववयवेषु एकग्रामवासिषु पुरुषेष्विव महान् विवादस्स्यात् । ग्रामीणानन्तपुरुषव्यवहारास्सर्व एवैकशरीरे प्रसज्येरन् । न च निर्विकल्पकज्ञानमात्रा (मात्रज्ञाना अ?) वयवा इति युक्तम् ; प्रवृत्तिविरोधात् , सुखादिव्यवहारानिर्वाहाच्च । यस्य खल्ववयवस्य चेष्टा दृश्यते तस्य चेष्टानुरूपप्रयत्नचिकीर्षाज्ञानसमवायाभावे तदनुपपत्तेः । ज्ञानविशेषरूपाणां

१. अवयवेभ्योऽवयविनो भेदाभावेऽप्यवयवव्यवस्थामात्रे ज्ञानमित्यपि न भवति । अवयवानुषङ्गदोषतादवस्थ्यादित्यर्थः स्यात ; उपरि तदुक्तेः । शुद्धपाठो निरीक्ष्यः ।

२. शङ्कते—शिर इति

वा तेषां प्रवृत्तिकारणत्वेन प्रत्यक्षसिद्धत्वात्। न चावयविन्येव समवेतानामेषामवयवव्यापार-हेतुत्वमिति वाच्यम्, ज्ञानमात्रस्यापि तथाभावप्रसङ्गात्। अस्त्वेवमिति चेत्, तत्र वक्ष्यामः। अपि च (अयञ्च ?) प्रादेशिकस्सार्वत्रिको वावयविगुणश्चैतन्यादिः। न ताव-त्प्रादेशिकः; प्रदेशभूतावयवासमवेतस्य प्रादेशिकत्वानुपपत्तेः। न च सार्वत्रिकः; सर्वत्र चेष्टादिप्रसङ्गात्।

भेदाग्रहादवयवानां परस्परकार्यभेदानध्यवसाय इति स्थवीयः; अवयवानां मिथो भेदस्य प्रत्यक्षसिद्धत्वात्। नाप्यवयविभेदाग्रहो युक्तः; अवयवकर्तृकस्यावयवि-भेदाग्रहस्यावयवान्तरभेदाभेदयोरकिञ्चित्करत्वात्। अवयवान्तरे चावयविनो भेदाग्रहेऽवय-विन एव नानात्वेन प्रतीतिस्स्यात्, अद्वैतिनामिवाहमर्थभेदवादिनामात्मनः। अवयवि-कर्तृकोऽवयवभेदाग्रहोऽप्यवयवानां स्वातन्त्र्यं द्विगुणयति। स ह्यवयवभेदभिन्नमात्मानमनु-सन्दधानो रागद्वेषाभ्यामाभिमानिकभेदगोचराभ्यां व्याहन्यतैवाद्वैतिनामेव, यथा ब्रह्मेति।

एकावयविपरिग्रहस्त्वेकग्रामपरिग्रहादिवदन्योन्यस्पर्धाविच्छेदाय नात्यन्ताय प्रभवति। एकावयविशेषतया सर्वेषां तदवयवानामविवादः भव...[न्म]त....[इव] मुक्तात्मवदिति चेत्, नैतदपि साधीयः; अहंत्वमादिभावेनावयवानां मिथो भेददर्शनानुपलम्भात्। संसारे हि न तावदेकश्चेतनश्चेतनान्तरमध्यक्षमीक्षते; देहान्तरेऽपि प्रसङ्गात्। न हि हस्तः पादं पादो वा हस्तमुभौ वावयवी सम्बोधयन् दृश्यते, दूरे शेषशेषिभावावबोधः। अपि च तेषामेवावयवानां नावयवस्या (नानावयव्या ?) रम्भकत्वेन नाशानुत्पादावस्थावयविबाहु-ल्यात् तत्तत्तादर्थ्यालाभनिमित्तदुःखबाहुल्यं प्रसज्येत। न च तत्प्रतिसन्धीयते। काला-न्तरारभ्यावयविनामेकनियमाभावाच्च नानावयवानां तत्तत्पारार्थ्यकृतविप्रतिपत्तिः पूर्ववदेव प्रसज्येत। अतो नैकशेष (षि ?) परिग्रहादप्यैकार्थ्यम्। एवञ्च सर्वदा कार्यचिन्ताचतुरैरव-यवैरवयव्यनुवर्तनं क्रियत इति राजसामन्तवार्तामवयवेषु सञ्चारयन्नशेषलोकापहास्य इति कृतमत्र विस्तरेण। अतस्सिद्धमवयवा न चेतयन्त इति।

१. प्रत्यक्षाभिन्नज्ञानेन विषयीकरोतीत्यर्थः।

ननु किमनेनाप्रस्तुतोपालम्भेन ? न हि शरीरवत्तदवयवांश्च स्वतन्त्रांश्चेतनानातिष्ठान (म?)(मह?) इति चेत्सत्यम् ; तथाप्यनेन प्रपञ्चेन तस्यैव मूले निहितः कुठारः । तथाहि— यदा तावदवयवेषु चैतन्यसम्भावना नास्पदाना (नास्पदं?) लभते तदा कैव कथावयविनि ? न हि कारणमन्तरेण कार्यमुदयमासादयति । अवयविगतविशेषगुणानामवयवगतैरेव हि तज्जातीयैरुत्पादः । गुणश्चा (कारणश्चा ?) (इदश्चा?) वयवारब्धद्रव्यान्तरावयव्यभ्युपगमे वक्तव्यम् । यदा तावदवयवा एव कश्चिद्विशेषमापन्ना अवयवी, नार्थान्तरम् ; तदावयवचैतन्यनिरासमात्रेण चरितार्थता । नह्यवयवातिरिक्तमवयविनं पश्यामः । अत एव ह्यवयवास्संश्लेषविशेषमापन्ना एकोऽवयवीति प्रतिपद्यते । तत्र यद्गुणैरवयवैर्योऽवयव्यारभ्यते, तद्गुण एवासौ नान्यादृशः । न च स्थूलस्यै(त्वै ?)कत्ववदवयविभाव एव चैतन्यमुत्पद्यत इति वाच्यम् ; तस्यावयवित्वनिर्वाहकत्वाभावात् । तथात्वे वा स्थूलत्वैकत्ववत्सर्वावयविष्वनुवृत्तिप्रसङ्गात् ॥

अपि चावयव्यवस्थायामेव भवतु नाम चैतन्यम् ; तथापि अवयवेष्वेव तस्य वृत्तेः पूर्वोक्तेर्ष्यादिदोषस्तदवस्थ एव ; आश्रयान्तराभावात् । द्वित्वादिवद्यद्यपि साधारणमेकमेव चैतन्यं ; तथापि तेन स्वात्मानं नानाभूतं प्रतिपद्येरन्नेव । तत्र यथा द्वयोरिदमिति निर्दिष्टं फलं द्वित्वाधिकरणयोस्तयोरेव, तथा चैतन्यफलभागित्वमपि चैतन्याधिकरणानां तेषामेवेति सर्वं पूर्वोक्तं तदवस्थमेव । नहि साधारणफलसिद्धये कश्चिदेको विनाशावधि व्याप्रियते । अपिच यो गुणो यस्मिन्नवयविनि समवेतः, तद्गुणावान्तरजात्या तज्जातीयगुणवन्तस्तदवयवाः पृथग्भूताश्चेति दृष्टम् । यदि तज्जातीयगुणोऽवयवेषु नास्ति कथं तस्यावयव्यवस्थायां तेषु वृत्तिरुपपद्यते । अतश्चैतन्यमात्रस्यावयवेषु निवृत्तेरवयविनि चैतन्यनिरासः । एवं प्रयत्नादेरपि द्रष्टव्यम् ।

एतेन प्रत्येकासमवेतमपि भूतेषु चैतन्यं शरीराख्यसङ्घाते जायते मदशक्तिवत्, चूर्णहरिद्रासंयोगजरागविशेषवद्वेति प्रत्युक्तम् । तत्रापि गुणावान्तरजात्या तज्जातीयगुणस्य तदवयवेषु विद्यमानत्वात्

ननु च....[यदि त]व तमोद्रव्यं परिणामविशेष(षे ?)ण महदहंकारतन्मात्राभूत-

पञ्चकरूपमवतिष्ठत इति सिद्धान्तः ; तदा गन्धस्य नाप्सु, रसस्य न तेजसि, रूपस्य न वायावित्यादिक्रमेण कारणेषु कार्यगुणस्य समवायो नाभ्युपेतः । तत्तपूर्वावस्थं तदेव हि द्रव्य_मुत्तरोत्तरगुणवत्तालक्षणावस्थाविशेषमासाद्य पृथिव्यादिभावमनुभवति । तथावयवेबु कारणेष्व_समवेतमपि चैतन्यमवयविनि जायताम्, किन्नोपपद्यते इति चेत्; न तावदिदमागमावसेयम्; तद्विरुद्धत्वात् । देहातिरिक्तः कर्मफलभोक्ता ज्ञानानन्दमयोऽपहतपाप्मत्वादिगुणक-परमात्मशरीरभूतोऽपृथक्सिद्धतया तच्छरीरभूतो जीव इति वेदागमप्रसिद्धिः । प्रकृतिपरि-णामविशेषस्तु प्रमाणान्तरागोचरश्शब्दैकसमधिगम्य इति तथैवेष्यते । तत्रापि सावयवस्य नावयवासमवेतगुणाधिकरणत्वमस्ति । तत्र पुनरवयवेषु पूर्वं तदानीमप्यविद्यमानमवय विनि संपद्यतामिति सकलप्रमाणतर्कविरुद्धं को नाम श्रद्दध्यात्?

यत्तु शरीरचैतन्यसिद्ध्यर्थमन्यत्रापि सूक्ष्मचैतन्यं कल्प्यतामित्युक्तम्; तदपि कल्पक(कं?)(नं?)शरीरावयवचैतन्यनिरासेन प्रत्युक्तमिति वेदितव्यम् । अवयवेष्वतिसूक्ष्म-चैतन्यमस्त्विवतिचेन्न; अवयव(वि?)गुणविजातीयस्यावयवगुणविशेषस्य द्रव्यान्तरावयव (वि?) पक्षास्मत्पक्षयोरविशेषेणानुपपत्तेः । तन्तुपटादिषु शौक्ल्यादेस्तीव्रत्वादिरविशिष्ट एव । न हि तन्तुषु मसृणशौक्ल्येषु पटस्तीव्रशौक्ल्य इति युज्यते ।

यत्तु भूतसमुदायरूपशरीरगुणस्य प्रत्येकसमवायानपेक्षेति, तदपि प्रत्येकसमवायानपे-क्षायामप्यवयवसमवायान(?) पेक्षा दुर्निवारेति निरस्तम् । न चानुपलभ्यमानानां (नना?) नाश्र-यचैतन्य....[तत्सौक्ष्म्यादि] कल्पनादाश्रयन्तरकल्पनं गरीयः । प्रत्युत स्फुटप्रतीयमाननिगा (निर्भागा?) हंप्रत्ययवेद्यचेतनस्य देहात्पृथग्भावमात्रमतिलाघवात्प्रत्येतव्य....[म् । यत्तु (यस्तु] पृथिवीविशेषेषु गन्धादिविशेषकल्पनं दृष्टान्तः, (तत?) सूक्ष्मतरतमादिभावेन क्रमेण तद्गुणानामुपलम्भात् नात्यन्ताय कल्पनमेवेति विशेषः । यत्त्वनुमानादिप्रामाण्यानभ्युपग-मात्सर्वमिदमनर्थकमिति, तत् प्रतिज्ञाविरुद्धम्, सर्वस्यानभ्युपगमादित्यादिहेतूपन्यासादित्या-दिना प्रामाण्यसमर्थनप्रकरणे प्रत्युक्तम् । अतो देहातिरिक्तश्चेतनः ।

अपि च

कार्यकारणभावे सत्यन्वयव्यतिरेकतः ।
संस्कारोन्मेषसिद्ध्यर्थं दृ(र्थमदृ ?)ष्टं सिद्धमात्मनि ॥

कार्यस्य सर्वस्य कादाचित्कत्वात्पूर्वावध्यपेक्षयां पूर्वस्य चावधेः किञ्चिज्जातीयस्य तत्तत्कार्यजातीयादन्वयव्यतिरेकवत्तया नियतत्वात्कारणत्वसिद्धो (द्धौ?) भवति कस्यचिदपरिदृश्यमानकारणस्यापि कारणापेक्षा। तत्र फलं पुंसां प्रवृत्तेः। सा चेच्छया। इच्छा च ज्ञानेनेति दृश्यते। तच्च ज्ञानं प्रमितिस्स्मृतिर्वा भवति। तत्र स्मृतिरननुभूतानि (तान्नि ?) वर्तमानाऽनुभूतिमपेक्षते। सा च संस्कारद्वारेण कारणं, चिरं निवृत्तत्वात्। संस्कारश्चोद्बोधमपेक्षते। अनन्तेषु पूर्वानुभूतेषु केषाञ्चिदेव सदृशदर्शनादिलब्धोद्बोधसंस्काराणां स्मृतिदर्शनात्। इतरथा सर्वस्मरणप्रसङ्गात्। उद्बोधश्च संस्कारस्य क्वचिदन्वयव्यतिरेकवद्भिर्दृष्टैः[1]। यत्र तु न किञ्चित्कारणं दृश्यते, यथा किं कर्तव्यमिदानीमिति समानकार्येषु बहुषु चिन्तया तेषु कस्यचित्[2]समीचीनम्, तत्रादृष्टमेव कारणं भवितुमर्हति। तत्तददृष्टविशेषलब्धोद्बोधसंस्कारजनितान्वयव्यतिरेकस्मरणप्रभवं हि तत्तत्कार्यज्ञानम्। तच्चादृष्टमस्मिन्नेव शरीरे संपादित (सम्भावित?) (सम्पाद्यता?) मिति न युक्तम्; समानदेशस्थानां समानाभ्यासानामेव पुरुषाणामन्योन्यविलक्षणविचित्रस्मरणपाटवात्। तत् तत्संस्कारोन्मेषकारणभूतादृष्टाधिकरणतया शरीरातिरिक्तात्मसिद्धिः।

अपि चैकस्मिन्नेव जन्मन्यभ्यासातिशयो वैशद्यमप्रमोषञ्च करोतीति व्याप्तमुपलब्धम्। तदेतदुभयमिह जन्मन्यलब्धाभ्यासं जन्मान्तराभ्यासमनुमापयति। दृश्यते हि कस्यचिद्विषयविशेषे स्मृतिवैशद्यमप्रमोषश्च। यतः कर्तव्या (काव्या ?) नि विरचयति; न शास्त्रार्थमल्पमप्यवगच्छति। अपि चातिसूक्ष्मं शास्त्रार्थमवगच्छति; न किञ्चिदपि कवयितुं शक्नोति। शास्त्रेष्वपि कश्चिद्व्याकरणे प्रगल्भते, अन्यस्तु मीमांसायाम्। अपरश्च न्यायतर्के। एवं चित्रास्स्मृत्यादिशक्तयः प्रतिनियतविषयाश्च तत्तद्विषयाभ्यासमन्तरेणालब्धात्मान-

१. इयं पञ्चमी.

२. तेषु मध्ये किञ्चिद्विषयकमेव ज्ञानमित्यर्थः।

स्तमनुमापयन्ति । स यस्य, असौ जन्मान्तरस्थायी शरीरातिरिक्त इति सिद्धयति । न चात्र दृष्टाहारादिसामग्रीपरम्पराश्रयणेन समाधातुं शक्यम्; अभ्यास एव वैशद्यप्रमोषयोः कारणमित्यन्वयव्यतिरेकदर्शनात् तदन्यथाकरणेनादृष्टचरकारणान्तरकल्पनानुपपत्तेः । दृष्टस्य शरीरावस्थादेः, तन्मूलस्याहारविशेषस्य च व्यभिचारित्वात् । यत्तु केषाञ्चिदाहारणां.... [वैशद्यादि] (स्मृत्यादि?) हेतुत्वमायुर्वेदसिद्धमिति स्मर्यते, तदपि जन्मान्तरस्थायिन्यात्मनि संस्काराधारे सिद्धे स्मृतिसमर्थमनःप्रणिधानादियोग्यदेहधातुसाम्यादिहेतुत्वेनेति द्रष्टव्यम् । अन्यथा तन्मात्रहेतुत्वे व्यभिचाराभावप्रसङ्गात्[1] ।

तथा प्रथमप्रवृत्त्यन्यथानुपपत्त्यापि जन्मान्तरसिद्धिः । तत्र यदुक्तं यादृच्छिकं प्रथमकर्मेति, तत् चेष्टात्वाङ्गीकारेणान्यथा वा? न तावच्चेष्टायाः प्रयत्नवाञ्छाबुद्धिमाला-मन्तरेणोत्पत्तिर्युक्ता । अचेष्टारूपा तु क्रिया पुलकस्वेदादिवदुपजायमाना नास्माभिरनु-मानतया वर्ण्यते । शरीरपारार्थ्यादिप्रतिपादनार्थमनुमानजालमत्रानुसन्धेयम् । देहचैतन्ये प्रतिसन्धानमपि[2]............आत्मन्यपि समानमेतत् । यत् स्मरणे बहिरिन्द्रियानपेक्षत्वमिति चेन्न; अनुभवेऽपि प्राप्तिमन्तरेणानुग्रहार्थं तदनपेक्षणात् । इदं[3]....हापि प्राप्त्यर्थमवयवापे-क्षेति न वाच्यम्; अवयविसंयोगस्यैवाव्यभिचारिणः प्राप्तत्वात् । अत एवंविधकल्पना-मन्तरेणापि हि स्मरणादिव्यवस्था सिद्धान्त उपपद्यते ।

मम शरीरमिति च ज्ञानमात्मनि शरीरातिरिक्ते प्रमाणम् । न च शरीरशब्दः स्वरूपवचनः; लोष्टादावपि प्रसङ्गात् । यत्तु शिलापुत्रकस्य शरीरमिति प्रयोगः, सोऽप्यौ-पचारिक एव; पुत्रत्वारोपेण प्रवृत्तत्वात् । ममात्मेति व्यतिरेकनिर्देशो मम स्वरूपमितिवद्द्र-ष्टव्यः । आत्मशब्दो ह्यनेकवचनः ।

१. तादृशाहारे सत्यप्यभ्यासाभावे स्मृतिवैशद्यादेरदर्शनेन व्यभिचारस्य स्पष्टतया व्यभि-चाराभावस्यानिष्टत्वादिति भावः ॥

२. अत्र पत्रमेकं पतितमिति मातृकासु लिखितमस्ति

३. इहापि. पा.

स्वप्नावस्थायाञ्चोपन(र ?) तेषु बहिरिन्द्रियेषु योऽहमिति प्रत्यक्षं[1] प्रमीयते, नासौ देहो भवितुमर्हति ; तस्य बहिरिन्द्रियगोचरत्वात् । अन्तःकरणगोचरत्वमपि ज्ञानोपधानेन तस्यैवेति चेन्न ; तस्य स्मृतिमन्तरेण स्वातन्त्र्यवि(न्त्र्यायो ?)योगात् । तच्चात्मनः स्वयम्प्रकाशत्वात्, ज्ञानस्य च ज्ञानान्तरापे (रानपे?) क्षत्वेन स्वयम्प्रकाशत्वात् । ज्ञानावान्तरभेदा-(दत्वा?) च्चेच्छादीनामन्तःकरणस्य शक्तिकल्पनायां प्रमाणाभावादिति सिद्धमन्यत्र । शरीरस्य त्वात्मनः स्वप्रकाशत्वमयुक्तम्; शरीरावस्थानिबन्धनत्वे सावयवप्रकाशप्रसङ्गात् । द्रव्यमात्रनिबन्धनत्वे त्वशरीरावस्थायां भूतान्तरे प्रसङ्गात्, सर्वस्य च सर्वदा सङ्कोचानुपपत्तेः । उपवीतो (उपाधितो?) हि सङ्कोचो न स्वतः ॥

किञ्च

शरीरमेव चेदात्मा विश्वलोकप्रवृत्तयः ।
अदृष्टार्था न सिद्ध्येयुर्विश्ववैचित्र्यमेव च ॥

सर्वेषां हि बहुविदां पुरुषाणामदृष्टार्थाः प्रायस्संवादिन्यः प्रवृत्तयः । योग्यानुपलब्धिकृत-दृष्टहेतुचक्रस्यादृष्टमेव कारणं भवितुमर्हति । अतो ज्ञातृत्वेनाहम (मिति?) प्रसिद्धश्शरीरातिरिक्त आत्मेति सिद्धम् ॥

अत्र केचिदाहुः—प्रत्यगर्थ एवात्मा ; न ज्ञाता अहमर्थः, तस्य प्रत्यक्षत्वायोगात् । संविदधीनसिद्धिकं हि सर्वं वस्तुजातम् । संविदो व्यतिरिच्यमानं परागर्थः । संवित्तु स्वात्मसिद्ध्यर्थमनन्यापेक्षा स्वात्मनश्चाव्यतिरिच्यमाना प्रत्यगर्थः । बहिः प्रकाशते परागर्थः अन्तः प्रत्यगर्थ इति हि तद्विवेकविदः । अन्तः स्वयं चाव्यतिरेके[2] पर्यवस्यति । संविदपेक्षया-चाव्यतिरेकस्संविद एवेति न संवेदिता प्रत्यगर्थः । सोऽपि स्वात्मापेक्षयाऽव्यतिरिक्त एवेति

१. इदं क्रियाविशेषणं, प्रत्यक्षप्रमितिविषयो भवतीत्यर्थः ।

२. अन्तश्शब्दः स्वयंशब्दश्चेत्यर्थः

चेन्न ; घटादयोऽपि स्वात्मापेक्षया न व्यतिरिच्यन्त इति तेऽपि तथा भवेयुः। तथापि ते स्वसिद्धिभूतां संविदमपेक्ष्य बहिर्भूता इति चेत् ; एवं संवेदितापीति पश्यतु भवान्।

अत्रोच्यते—

प्रत्यक्त्वं ज्ञातुरेव स्यान्न ज्ञानेऽप्युपपद्यते।
यस्मै प्रकाशते सर्वं तत्प्रत्यगिति तद्विदः ॥

संवेद्यं स्वप्रकाशञ्च जगद्द्वेधा प्रकाशते।
स्वप्रकाशे ह्यनन्यार्थे प्रत्यक्त्वमिति निश्चयः ॥

जडेषु घटादिभावेषु दृगधीनसिद्धिषु परात्त्वं दृग्व्यतिरेकमात्रकृतं तादृक् तादर्थ्य (उत दृक्तादर्थ्या?)भावकृतमिति विवेचनीयम्। यस्य हि विपक्षे बाधकस्तर्कोऽस्ति स एव प्रामाणिक पक्षः। यदि हि दृग्व्यतिरेकमात्रात्परात्त्वं दृक्तादर्थ्याभावेऽपि दृशि प्रत्यक्त्वं स्यात्। तस्याश्चात्मत्वे पुरुषार्थभाजनत्वायोग्यत्वाद्बन्धमोक्षौ नात्मन इत्यापद्येत। दृक्तादर्थ्यं हि पुरुषार्थभागित्वे निदानम्। यस्मै सुखं वा स एव सुखी वेति गीयते? यस्य सुखं भासते, स एवेति चेन्न; तस्यापि तस्मै प्रकाशमानस्यैव तत्त्वम्। इतरथा जडस्यापि सुखित्वप्रसङ्गः। तदनुकूलमपि हि कश्चिच्चेतनः प्रतिपद्यते। अनुकूलवेदनीयमेव हि सुखम्। तद्विधतिर्वा[1] (यद्वा?) परेण ज्ञायमानपुत्रजन्मनः पुत्रिणस्तदजानतोऽपि सुखित्वप्रसङ्गः। अतः तत्प्रतियोगिकं तदर्थज्ञानगोचरश्चानुकूलं सुखं, तथाविधं प्रतिकूलं दुःखं, तत्प्रतियोगिकानुकूलज्ञानं वा तादर्थ्यविशेषितं सुखम्, तथाविधं प्रतिकूलज्ञानं वा दुःखमिति सुखदुःखयोस्स्वरूपविवेकः। आत्मधर्मान्तररूपं सुखं दुःखं चेति भवताप्यनभ्युपगतमेव। येनापि वाभ्युपेतम्, तेनापि तदर्थप्रकाशगोचरतयैव तथेष्यते। अत एव हि जडात्मवादिनः तार्किकाग्रेसराः प्रत्येतुः प्रत्येतव्याद्व्यतिरेकः प्रत्यक्त्वमिति तल्लक्षणमाचक्षते। एतेन भवत्पक्षे बाधकप्रमाणमुक्तमित्यप्यनुसन्धातव्यम्। नचैवं क्वचित्पक्षे[2] बाधकमुत्प्रेक्षितुमपि शक्यम्,

१. तद्विदधति वा पा०.

२. तार्किकपक्षेऽस्मत्पक्षे वेत्यर्थः

परोक्ष (पराक्षु?) घटादिषु दृग्व्यतिरेकात्तत्त्वमित्यस्य विपक्षे दृशोऽपि (अदृशोऽपि?) तार्किकात्मनः प्रत्यक्त्वे दृशोऽपि धर्मभूतज्ञानस्य चा प्रत्यक्षे (त्त्वे?) न किंचिदत्र बाधकमस्ति। घटादेरपि प्रत्यक्त्वप्रसङ्गस्तार्किकपक्षे, तव त्वात्मनोऽपि परात्त्वप्रसङ्ग इति चेत् , स्यादेतदेवं, यद्यदृक्त्वादेव तार्किकः प्रत्यक्त्वं ब्रूयात्, अहं वा दृक्त्वादेव परात्त्वम्। नचैवमुभावप्यनु... (भि?) दध्वहे। प्रकाशमानस्य प्रकाशतादर्थ्यात् प्रत्यक्त्वम्। तद्व्यतिरेकात्परात्त्वम्। यथा यथं व्यतिरेकश्च विशेषणविशेष्योभयव्यतिरेकात्मना त्रिविधो द्रष्टव्यः। नचैवं सति तार्किकवद-स्मत्पक्षेऽपि प्रतीचो जडत्वप्रसङ्गः; प्रमाणान्तरेण तस्य स्वयंप्रकाशत्वसिद्धेः। तच्चोक्तमन्यत्र। एतत्सर्वमभिसन्धायाहुर्भगवद्भाष्यकारमिश्राः, 'जानामीति धर्मधर्मितया प्रत्यक्षप्रतीति-विरोधादेव' इति।

ननु चैवं सति भवत्सिद्धान्ते मोक्षस्य पारार्थ्यान (?) नुसन्धानलक्षणत्वात्परमात्मैक एव प्रत्यक्, अन्ये तु पराञ्च आत्मानः प्रसज्यन्ते इति चेन्मैवम्, तदानीमप्यात्मस्वरूपस्या-नन्याधीनप्रकाशस्य स्वस्मै भासमानत्वात्। धर्मभूतज्ञानस्यापि तस्मै भासमानत्वात्। कथमियं चतुर्थी घटते परमात्मशेषत्वादस्येति चेत्सत्यम्, तदानीं धर्मभूतज्ञानगोचरेण तद्विशिष्टेन रूपेणासौ परमात्मार्थोऽवसीयत एव। तथापि तद्विशेष्येण स्वप्रकाशेन रूपेण स्वार्थोऽवसीयते। रूपभेदाच्चाविरोधः। प्रकाशतादर्थ्यमात्रप्रयुक्तं प्रत्यक्त्वं भोक्तृत्वं च, परशेषत्वकृतं भोग्यत्वं चेत्यनवद्यमुभयमिति। प्रत्यक्त्वं चास्मदर्थः परात्त्वं युष्मदर्थः, प्रत्यक्त्वसमानाधिकरणञ्च ज्ञातृत्वं प्रत्यक्षं सर्वलोकप्रसिद्धमिति को नामास्मदर्थं पराञ्चं युष्मदर्थं प्रत्यञ्चं ब्रूयादृते देवानां प्रियात्।

अयं चात्मा कर्ता, स्वातन्त्र्यादेव यत्नं प्रति। स्वातन्त्र्यं कर्तृत्वम्। स हि तस्य क्रिया। परमात्मनीवास्मिन्नपि मुख्यं कर्तृत्वम्। अचेतनेषु केवलमुपचर्यते। इदमेव च जगद्वैचित्र्यं (त्र्य?) निदानम्। न ह्यचेतनं चेतनानधिष्ठितमेव तथा तथा परिणमते यथा-यथा सुखीवेद्या (खित्वाद्या?) पद्येत। न चेश्वरः स्वातन्त्र्येण तथा तथा परिणमयति 'समोऽहं सर्वभूतेषु, 'न मां कर्माणि लिंपन्ति न मे कर्मफले स्पृहा' 'निरञ्जनं निरवद्यम्' इत्यादि-

प्रमाणविरोधात्। अतो जीवस्वातन्त्र्यं एवं (न्त्र्यमेव?) पुण्यापुण्यद्वारेण विचित्रसुखदुःखापादकविश्वपरिणामे कारणम्।

ननु चेदं सिद्धान्तविरुद्धं बहुप्रमाणविरुद्धं च लक्ष्यते। तथा हि—विश्वप्रपञ्चशरीरः परमात्मेति सिद्धान्तः। 'यस्य आत्माशरीरं य आत्मानमन्तरोयमयति,' 'अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा', इत्यादि श्रुतयश्च सर्वेषामात्मनां परमात्मशरीरतां तन्नियाम्यत्वञ्च प्रतिपादयन्ति। शरीरं चात्रापेक्षया स्वतन्त्रमिति वचनमसङ्गतम्; प्रत्यक्षविरोधात्। पारतन्त्र्यस्यैव तल्लक्षणतया तत्रैवाभिधानात्। किंच 'एषह्येवासाधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषति। एष एवा साधु कर्म कारयति तम्, यमधो निनीषति, इत्युत्कृष्टापकृष्टगतिसाधनपुण्यापुण्यगतिकर्मसु बलाज्जीवान्परः प्रवर्तयतीति साक्षादेव श्रूयते।

स्मृतिश्च

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥

तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्रमसुरा(शुभा)नासुरीष्वेव योनिषु॥

इत्यादिकमेवार्थं विशदयतीति। यदि च जीवस्स्वातन्त्र्येण कुर्यादीश्वरस्स्य तत्त्वमतिसंकुचितमेव स्यात्; सर्वजीवेषु तस्य निरवकाशत्वात्। ततश्च 'तमीश्वराणां परमं महेश्वरम्' इत्यादिकाः श्रुतयः प्रकुप्येयुरिति चेत्;

अत्रोच्यते—

जीवत्वाय स्वतन्त्रत्वमीश्वरायत्तमिष्यताम् ।
कर्मणां च फलं पुंसां परानुग्रहनिग्रहौ ॥

तत्र यत्तावदुक्तं शरीरत्वाज्जीवस्य परनियाम्यस्य स्वातन्त्र्यायोग इति; तत्र नियमनमेव नियाम्यस्य स्वातन्त्र्यमावहतीति ब्रूमः । यथा हि राजा भृत्यमादायामुं देशं नियच्छेति नियुङ्क्ते, राजशासनानुवर्ती च भृत्यस्स्वातन्त्र्येणानुतिष्ठति, एवमिहापि । अत्र त्वनिदंप्रथमपरात्मेच्छागोचरस्य जीवस्य तदनुरूपमनादिस्वातन्त्र्यमिति विशेषः । न हि यत्नेनैव नियमनमिति निर्बन्धः; अनुमतिदानमात्रेणापि तदुपपत्तेः । निवर्तनसमर्थस्यानुमतिरपि हि प्रवर्तनमेव । अत्र त्विच्छाधिक्यमप्यस्तीति विशेषः । नित्यस्यापि परापेक्षत्वं नित्यद्रव्याश्रितनित्यगुणवदविरुद्धमिति सर्वैरभ्युपेत्यम्[1] । ननु यदि निवर्तनसमर्थः, प्रतिषिद्धे कर्मणि प्रवर्तमानमेनं किं न निवर्तयेत्? तर्हि कूपे पतन्तमिव पुत्रमनुमन्यमानो निर्घृण इत्यापद्येत । स्यादेतदेवं, यदि साम्यमेनं न प्रतिबध्नीयात् । समस्तवस्तुनो जीवानामनुकूलप्रतिकूलयोः कर्मणोस्साधारणं स्वातन्त्र्यं दत्वा यद्यन्यतरकर्मप्रवृत्तेरर्वागेव तन्निरुन्ध्यात्, ततः स्वातन्त्र्येण प्रवृत्तिसामर्थ्यं जीवानां निष्फलमापद्येत । कस्मै चित्पुरुषार्थोपहितं यत्नमेव विहन्ति वि . . . यश्च मश्च(?) स्यात् ।

अथ प्रतिरूपप्रयत्नक्षणानन्तरं तत्प्रतिबन्धं निवर्तयत्विति मतम्, तदयुक्तम्; द्वितीयादिकर्मस्वनुकूलस्यापि संभवात् । तदानीमपि स्वातन्त्र्यस्यानपायात् । उपक्रमानुकूलशेषप्रवर्तनस्य मात्रयोपक्रमफलैकोटिनिक्षेपार्हत्वात् । यदि कृतस्य प्रतिकूलफलं न प्रयच्छेत्, उपक्रान्तस्य तस्य मध्ये निरोधं वा कुर्यात्, तत्र त्वपरस्यानुकूलयत्नं कृतवतः फलं प्रयच्छति; प्रतिकूलयत्नवतस्तु न फलम् । प्रत्युत निरोधमेव करोतीति सुमहद्वैषम्यम् । अथ तु पाक्षिकप्रतिकूलप्रवृत्तिशङ्कया जी वेषु स्वातन्त्र्यमेव कारुणिको न प्रवर्तयत्विति मतम्, तत्र ईश्वरस्वातन्त्र्यमेवोत्तरम् । धर्मिग्राहकप्रमाणसिद्धश्चैतत् । न चैतावता निर्घृण-

१. अभ्युपेतव्यम् पा०

त्वम् ; प्रसक्तदुःखनिराचिकीर्षारूपत्वात्तस्याः । निरुपाधिः परदुःखासहिष्णुता दयेति हि तल्लक्षणम् । साधारणस्वातन्त्र्यदानमात्रस्य तया विरोधाभावात् । स्वातन्त्र्यञ्च स्वतस्सत्यकामत्वसत्यसंकल्पाविर्भावदशायामपरिमितपुरुषार्थप्रसाद(ध?)कमित्येव भगवदौदार्यादाश्रीयते । संसारदशायां तन्निवर्तकञ्च (नञ्च न ?) युक्तम् । पुंण्यवतः पुण्यप्रवृत्तेर्निवारणायोगात्, पापवतः पापप्रवृत्तेरपि निवारणानुपपत्तेः, सपुण्यपापस्यापि तत्तदंशाभ्यां तत्तत्प्रवृत्तिनिवारणस्य प्रतिबन्धात् । कर्मानपेक्षत्वे विषमे पुंसि समस्य कर्मविरोधेन विषमस्य च वैषम्यनैर्घृण्यदोषप्रसङ्गात् व्यापारानुपपत्तिः । अतो निराचिकीर्षितजीवदुःखोत्पत्तिः जीवमात्रमूला, तन्निराकरणं च भगवतो लीला । न हि उत्पत्स्यमानमेव जानता निरसनीयमिति पर्यनुयोगावकाशः ; लीलाव्याघातप्रसङ्गात् । साम्यव्याघातप्रसङ्गश्च पूर्वोक्तः ।

ननूत्पन्नं दुःखमसहमानस्तदुत्पत्स्यमानमपि न सहेतैव । सर्वज्ञो ह्यसौ । न ह्यनागतं न वेत्तीति युज्यते । उत्पत्स्यमानं च सहमानः तदुत्पन्नमपि सहेतैव । असहमानोऽपि किंचित् (स्वित् ?) करोति, तस्य स्वयमेव नश्वरस्य दुःखस्य विनाशध्रौव्यात् । वैषम्य(भीते?) (रहि ?) तेन चेश्वरेण कारणे सत्यनुत्पादनायोगात् । अतो दयावसरो न दृश्यते । मैवम्, तथापि कश्चिदस्या(दस्त्य?)वकाशः करुणायाः, यस्य साम्यादिभिः गुणान्तरैः न प्रतिबन्धो दृश्यते । तथा सर्वसाधारणे शास्त्रप्रवर्तने साधुपरित्राणे सामान्य दृष्टा(?)संहारे च । विषमसृष्टिः चतुर्मखात् कर्मविशेषमूलात् (?) । ततः पूर्वं समष्टिसृष्टिः केवलकरुणामूला । लीलारसायैवेति चेत्सत्यम्, तथापि करुणासहचारिणी सा; समानविषयत्वादुभयोः । मोक्षोपायत्वेन लीलाविच्छेदसाधारण्यात् । न च करुणामतिपत्य लीलारसः कश्चित् । ततः उत्पत्स्यमानमेव दुःखं निरुणद्धि । तत्तु साम्यानुरोधेन ज्ञानादिनेति सिद्धं कारुणिकत्व-

१. ईश्वरः कर्मसापेक्षो निर्वतयेत्, निरपेक्षो वा ? आद्ये आह-पुण्येति । अन्त्ये-कर्मेति । तत्रापि समो विषमोवा ?; आद्ये पुण्यकृतः कार्ये प्रवर्तनं अन्यस्य निवर्तनञ्च साम्यबाधकत्वाद्विरुद्धम्, पुण्ये पश्चात्तनसुखवत्पापेऽपि तात्कालिकसुखभावाच्च; अन्त्ये वैषम्यमेव दोषः । अतो निवर्तनव्यापारो नोपपद्यत इति ।

मपि। ततो जीवेषु स्वातन्त्र्यविधानमीश्वरस्य स्वातन्त्र्यमुद्वेलयत्येव। न च करुणां प्रतिक्षिपति।

यच्चापरमुक्तं पुण्यपापयोः ईश्वर एव साक्षात्प्रेरयितेति, तत्पुण्यपापयोर्[1]त्यन्तप्रवृत्तजीवविशेषविषयम्, तत्फलभूतञ्चेत्यनुसन्धातव्यम्। तथैव हि तत्र तत्र प्रकरणे स्पष्टमुपलभ्यते। पुण्यस्य हि सुखं, पुण्यानुकूलं जन्म ज्ञानं, रुचिर्वसना चेति फलानि। पापस्य हि दुःखं, पापानुकूलजन्मादि चेति सर्वशास्त्रसिद्धमेतत्।

जीवानां परस्परभेदः प्रत्यक्षः स्वरूपभेदस्य स्वयंप्रकाशत्वात्। अयमेव हि प्रतियोगिज्ञानानन्तरं भेद इति व्यवह्रियते; प्रतियोग्युपलक्षिताकारे व्युत्पन्नत्वात् भेदशब्दस्य। भावान्तरस्याभावत्वं समर्थितमन्यत्र। तथा विरुद्धधर्माध्यासाच्च जीवानां भेदसिद्धिः। यदि सर्वत्रैकस्स्यादात्मा बुद्धिसुखदुःखेच्छाद्वेषकरणतदधिष्ठिता(ष्ठाना?)दि व्यवस्था न सिद्ध्येत्। न हि यमर्थमेको यदा जानाति, तदैव सर्वोऽपि तम्। तदा ह्यर्थान्तरप्रसक्तो वा सुषुप्त्याद्यवस्थापन्नो वा भवत्यन्यः। यदि त्वेकस्य ज्ञानमेव सर्वस्य ज्ञानं स्यात्, शिष्याचार्यबहुश्रुतमन्दमतित्वादिव्यवस्था न सिद्ध्येत। एकेन अनुभूतमर्थं सर्वे च संस्मरेयुः। सुखदुःखादेश्चाप्रतिसन्धानमात्मैक्ये न घटते। प्रतिसन्धातुरात्मन एकत्वे नानावयवावच्छिन्नसुखदुःखादिवन्नानादेहगोचरस्यापि तस्य प्रतिसंधानमवर्जनीयम्। तथा[2] कस्यचिदिष्टमेव तदैव कस्य चिदनिष्टमिष्टं वा (द्विष्टंवा ?) भवति। एकमेव द्रव्यमेकस्यैकदैव देहावयवभेदेनाप्यनिष्ट (प्यनिष्टमिष्ट?)ञ्च दृश्यते; तथा देहभेदेनापीति चेत्; सत्यम्। तथापि तत्तदंशभेदेनेष्टत्वानिष्टत्वाभ्यां प्रतिसन्धानवत् तत्तद्भेदेनापि (तत्तद्देहभेदेनापि?) तदवर्जनीयम्। तथा करणानि ज्ञानकर्माणि....[निर्वर्तयन्ति प्र]त्यातमनियतेपकारकाणि तत्तन्मात्राधिष्ठेयानि च भवन्ति। तदपि भोक्तुरधिष्ठातुश्च सर्वत्रैकतां व्याहन्ति। तथा सत्यन्धबधिराद्यभावप्रसङ्गश्च। यत्किंचिद्देहवर्तिभिरपि चक्षुरादिभिः कारणवत्तत्तद्विषयोपलंभसंभव-

१. अत्यन्तासिद्धिप्रवृत्त. पा०

२. तथैव कस्यचिदिष्टमनिष्टं वा. पा०

सिद्धेः। न ह्यत्र कतिपयचक्षुरादिवैकल्यनिदानोऽन्धादिव्यपदेशः; अन्धोऽहमिममर्थं न कथंचिदपि जानामीति तद्विषयोपलंभाभावपर्यन्तानुसंधानात्। तथा एकस्मिन्नेवार्थे कश्चित्प्रवर्तते; कश्चिन्निवर्तते; कश्चिदेव प्रतिबिभित्सति[1]। स्वार्थे प्रवर्तमानस्य परैः प्रायशः प्रतिबन्धसम्भावनन्तु सर्वदा सर्वैरेवास्योपजायते[2]। असङ्कीर्णं कार्यान्तरं हि तत्। न हि कस्मिंश्चित्प्रवर्तमाने सर्वेऽपि प्रवर्तन्ते। एकस्यैका प्रवृत्तिरेव सर्वेषां प्रवृत्तिरिति चेत्, तर्ह्येकैव सर्वेति कृतार्थता वा किं न स्यात्? एवं चैको घटः सर्वं जगदित्यपि स्यात्। तथाऽप्यात्मान्तरसद्भावे सिद्धे सर्वमेवं वक्तव्यम्; तत्रैव किं प्रमाणमिति चेत्, चेष्टादिलिङ्गमनुमानम्। तच्च प्रत्यक्ष स्वात्म(क्षम्। स्वात्म?) तादात्म्यमपि केनचिदनुमानेन सिद्ध्यतीति[3] चेन्न; तस्य प्रत्यक्षत्वाप्रत्यक्षत्वसुखत्वदुःखत्वे(सुखित्व दुःखित्वे?)त्यादिविरुद्धधर्माध्यासेन बाधात्। तस्य सर्वस्यौपाधिकत्वादविरोधे सत्यबाध इति चेत्, स किमुपाधिः शास्त्रसिद्धः, उत प्रमाणान्तरसिद्धः। नाद्यः; स्वाभाविके जीवभेदे तेषां परमात्मनो भेदे च तस्य तात्पर्यावधारणात्। 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते, 'पृथगात्मानं प्रेरितारं च मत्वा जुष्ट स्ततस्तेनामृतत्वमेति' 'द्वाविमौ पुरुषौ लोके,' 'अतोऽस्मिन् लोके वेदे च प्रथितः पुरुषोत्तमः' इत्यादेः।

'एको देवस्सर्वभूतेषु गूढः' इत्यादेरन्तर्यामिपरमात्मविषयत्वात्, जीवाद्वैतवादानां प्रकाराद्वैते पर्यवसानात्, अविद्याभेदप्रतिक्षेपस्य तद्वैधर्म्यविषयत्वाच्चास्यार्थस्य न विरोधः क्वचिदपि शङ्कनीयः ॥

यत्तु अविद्याज्ञानादिशब्दैस्तत्तत्रोपदिश्यते तत् यथा यथं प्रकरणादिवशेन कर्म, प्रकृतितत्त्वं वा विज्ञेयम्। न च तत्सिद्धिमात्रेण जीवभेदस्तत्प्रयुक्त इत्यापतति। कर्मणस्तु विशेषतो जीवभेदापादकत्वमेवेति न शास्त्रेणौपाधिकत्वसिद्धिः।

१. प्रतिपिपित्सति. पा०.

२. स्वार्थे प्रवर्तमानस्य सर्वदा परैः सर्वैरेव प्रतिबन्धसम्भावनं प्रायश उपजायत इत्यन्वयः—

३. न सिद्ध्यतीति. पा०

न च प्रमाणान्तरेण। तद्धि न तावत्प्रत्यक्षम्, तस्य शरीरगोचरत्वेऽपि तस्योपाधित्वेनाप्रतिपत्तेः। आत्माद्वैतोपलंभे सिद्धे हि शरीरभेदानुविधायिन्यास्सुखदुःखादिव्यवस्थायास्तदुपाधिकत्वसिद्धिः, यथा श्वेतस्फटिकनिश्चयानन्तरमेव जपाकुसुमस्य तद्रागोपाधित्वनिश्चयः। स्वयंप्रकाशप्रत्यक्षे तन्मात्रोपलंभबलादेवात्माद्वैतमपि सिद्धमिति चेन्न; आत्मान्तरस्य तत्र प्रथमं योग्यत्वासिद्धेः। अयोग्यस्यानुपलभ्यमानस्य तन्मात्रोपलंभेनाभावनिश्चयायोगात्। अधिकरणमात्रोपलम्भो हि प्रतियोगिनो योग्यस्यानुपलम्भात्मकः[1] तस्याभावमधिकरणं तद्धर्मं वा व्यवहारयतीति सिद्धमन्यत्र। अतः स्वरूपसिद्धिरेव स्वयंप्रकाशत्वेनेति नेतरप्रतिक्षेपः; तथाऽपि तत्र इतरविध्यभावात्तदभावः शङ्क्यत इति चेन्न; अनुमानेन तत्सिद्धेरुक्तत्वात्। अनुमानत्वमौपाधिकेऽपि भेदे पर्यवस्यतीति चेन्न; अन्योन्याश्रयत्वात्। औपाधिकत्वसिद्धौ हि आत्मलाभा (भेदा?) सिद्धिः, आत्मान्तराभावे च देहभेदोपाधित्वसिद्धिः सुखदुःखादिभेदभिन्नानुमानस्येति[2]। एवमपि यद्याशङ्क्येत, नीलादिगुणभेदोपाधिको घटादिव्यक्तिभेदः व्यक्तिभेदोपाधिको वा तत्तद्गुणभेद इति अन्यतरभेदापलापः प्रसज्येत। तत्रोभयमपि प्रत्यक्षेण भिन्नमुपलभ्यत इति चेत्, इहापि द्वयं प्रत्यक्षानुमानाभ्यामुपलभ्यत इति तुल्यम्। नहि प्रत्यक्षे सत्युपाध्यनवकाश इति शक्यं वक्तुम्; स्फटिकारुण्यस्य स्वाभाविकत्वप्रसङ्गात्।

अपि च,

देहभेदोऽपि नैकस्य प्रतिसन्धानबाधकः।
सौभरिप्रतिसन्धानमिष्यते भिन्नदेहजम्॥

१. एकानुपलम्भस्यान्योपलम्भरूपत्वमभावस्य भावरूपत्वात्। तत्राधिकरणस्वरूपता तद्वृत्तिधर्मस्वरूपतेति पक्षद्वयाभिप्रायेणाधिकरणं तद्धर्मं वेत्युक्तिः।

२. सुखदुःखादिभेदप्रयुक्तपरस्परभेदविशिष्टात्मानुमापकहेतोरित्यर्थः।

एवमात्मभेदस्य धर्मिग्राहकप्रमाणसिद्धत्वादनुमानेनापि नोपाधिसिद्धिः। आत्मभेदापलापस्तु प्रपञ्चापलापसमानयोगक्षेम इति तत्परिहारेण तुल्यं परिहृतोऽन्यत्र[1]। देहोपाधिविधूनन-न्यायेनाऽन्यस्याप्युपाधेस्तत्त्वं निरस्तम्

किं च तन्न तावदन्तः करणम्; तस्यात्मभेदमन्तरेण भेदासिद्धेः। प्रत्यक्षस्यात्मनो ज्ञानोदयमा(यानु ?)नुगुण्येन बहिरिन्द्रियोत्तीर्णमन्तःकरणं प्रत्यात्मभेदभिन्नमनुमीयते; तत्कथ-मात्मभेदापलापे कारणं भवेत्? अहंकारस्त्वेकमेव तत्त्वं सर्वेषां साधारणमनुग्रहमातनोति तदनुगृहीताश्चात्मानः तत्तददृष्टोन्मिषितरजस्तमस्सहकृतास्तत्परिमाणानुकूलमहि (भि?) मानं कुर्वन्तीति शास्त्रस्थानां निर्णयः। एतद्विलक्षणस्त्वहंकारो न केनापि प्रमाणेन सिद्ध्यति। दृष्टात्मभेदपरित्यागायादृष्टतद्भेदकल्पनं लोकोत्तरप्रज्ञस्यैव शोभतेतराम्॥

न च अविद्याभेद एव जीवभेदकल्पकः, तद्भेदस्याप्यसिद्धेः। प्रत्यक्षं ह्यज्ञानं ज्ञानाभाव एव। तदतिरिक्तं भावरूपन्तु न कल्पनामन्तरेण सिद्ध्यति। दर्शनभेदोपपादनाय च तत्करणभेदः कल्पनीयः; न तु तदपह्नवाय। स्वयंप्रकाशश्चात्मभेदो दर्शनभेदकोटिनि-विष्टो न दृश्यपक्षे[2]निक्षेपमर्हतीति कथं तदभावायाविद्याकल्पनमुपपद्यते। यद्यप्येकस्मै न सर्वे स्वयं प्रकाशाः, तथापि स्वयं प्रकाशतयैव अनुमीयते (न्ते?)। दृश्यबाधाद्दर्शनमपि मिथ्येति वादश्च दृश्यशून्ये दृङ्मात्र आत्मनि निरवकाश एव। धर्मभूतज्ञानं हि दृश्यप्रवणं नाम, न स्वरूपम्। दृश्यबाधे दर्शनमपि मिथ्येत्यप्यसङ्गतम्। अन्यबाधस्यान्यमिथ्यात्वं प्रत्य-हेतुत्वात् इत्याद्युक्तमन्यथाख्यातिमाश्रित्य। यथार्थख्यातिसिद्धान्ते तु व्यवहारमात्रमेव बाध्यते, न दृश्यमपीति सुतरां दृग्भेदबाधानवकाशः।

१. अन्यत्र कृतेन प्रपञ्चापलापपरिहारेण आत्मभेदापलापोऽपि परिहृतः। परिहारस्य तुल्य-त्वादित्यर्थः।

२. दृश्यत्वे हि मिथ्यात्वम्; मिथ्याभूततद्भावायाविद्याकल्पनम्। एवमाविद्यकत्वात्पश्चा-त्तदभावावधारणं च स्यात् ब्रह्मवत्। स्वप्रकाशः पुनरात्मभेद इति भावः।

किमाश्रिता चाविद्या जीवभेदं कल्पयेत्? ब्रह्माश्रितेति चेन्न; तस्य तद्विरोधित्वात्। अविरोधित्वे चानिर्मोक्षप्रसंगात्। न चाविशदं रूपमविरोधि, विशदन्तु विरोधि निवर्तकं चेति वाच्यम्; निर्विशेषवैशद्यावैशद्ययोरसंभवात्। निर्विशेषस्यापि सद्वितीयत्वमवैशद्यम्, अद्वितीयत्वन्तु वैशद्यमिति विवेक इति चेन्न; आत्माश्रयत्वप्रसंगात्। सद्वितीयत्वलक्षणाविशदरूपावभासो ह्यध्यासहेतुः, स एव चाध्यासः। अधिष्ठानेन सहाध्यस्यमानस्य प्रकाश एवाध्यास इति सर्वसंमतम्। न चाद्वितीयं किंचित्पारमार्थिकमस्ति, यतस्तेन सद्वितीयत्वमवैशद्यमिति स्यात्। विशदावभासाद्भेदनिवृत्तावपि चात्माश्रयत्वम्; भेदनिवृत्त्यात्मकत्वाद्विशदावभासस्य। अवैशद्यञ्च किं स्वभावः, उत अविद्याकल्पितम्? स्वभावत्वे चानिर्मोक्षः। द्वितीयेऽन्योन्याश्रयत्वम्। अविद्यायाश्च मथ्यात्वादविद्यान्तरापेक्षयानवस्था। स्वपरनिर्वाहकत्वन्तु दृष्टे कार्य एव युज्यते कल्पयितुम्। दृष्टयदृष्टिभ्यामेव अध्ययनविधिशब्दशब्दादिप्रतिबन्द्युद्धारश्च[१] द्रष्टव्यः। कारणदोषमन्तरेण मिथ्यात्वमपि न शक्यते कल्पयितुम्; स्वतः प्रामाण्याभ्युपगमात्। बाधादेव मिथ्यात्वं परतः प्रामाण्येऽपि। अबाधादेवेश्वरज्ञानस्य न्याये सत्यत्ववदिति[२] चेन्न; इतः पूर्वं बाधस्यादृष्टत्वात्परत्रापि काले निर्दोषप्रकाशसिद्धत्वेन दृक्स्वरूपवदबाधानुमानात्। न्याये तु धर्मिग्राहकमेव मानमबाधं व्यवस्थापयति। अत्र तु धर्मिग्राहकमानं सत्यत्वमेवावगाहत इति विपरीतमेव; दोषस्य च परमार्थस्यैव भ्रान्तिनिर्वाहकत्वादधिष्ठानवत्। इतरथा ह्यधिष्ठानमपि सत्यं न स्यात्। एतेनाऽनादित्वादविद्यान्तरं नापेक्ष्यत इति प्रत्युक्तम्। अपरमार्थस्य स्वरूपानादित्वायोगात्। प्रवाहानादित्वे च घटाद्यविशेषप्रसंगात्। ब्रह्माज्ञानवादे बन्धमोक्षव्यवस्थाया असिद्धेरशास्त्रं सर्वमनर्थकमापद्यत इत्याद्यनन्तदोषाः कृत-

१. यथा स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिना वाक्यान्तरमिव स्वात्मापि गृह्यते, यथा च शब्द इति शब्दः घटादिशब्दमिव शब्द इति शब्दमपि वक्ति, तथा अविद्या स्वमिथ्यात्वेऽविद्यान्तरं नापेक्षत इति न युक्तम्; दर्शनादर्शनाभ्यां विशेषादिति भावः॥

२. न्यायमते ईश्वरज्ञानस्य प्रमात्वं यथा प्रमात्वबाधकाभावात् स्वीक्रियते, तथाऽविद्याया अपि मिथ्यात्वमपि मिथ्यात्वबाधकमानाभावादिष्यत इति शङ्का। अविद्यास्वरूपस्य पूर्वं पश्चाच्च बाधादर्शनेन सत्यत्वसिद्ध्या न मिथ्यात्वमिति परिहारः।

बुद्धिभिरनुसन्धातव्याः। जीवाज्ञानवादश्च यथायथं पूर्वोक्तैरन्योन्याश्रयत्वादिभिरपास्त एव। अतो जीवानां परस्परं परमात्मनश्च भेदस्स्वाभाविक इति परमात्मशरीरभूतस्तदनुगृहीतः कर्ता अहंप्रत्ययवेद्यः ज्ञानादिगुणकश्शरीरेन्द्रियबुद्धिमनःप्राणविलक्षणश्च जीवात्मेति सर्वमवदातम् ॥

इति श्रीभगवद्रामानुजमुनिवरमतधुरन्धरस्यात्रिगोत्रप्रदीप-
श्रीपद्मनाभार्यनन्दनस्य वादिहंसनवाम्बुदस्य
श्रीरामानुजार्यस्य कृतिषु न्यायकुलिशे
देहाद्यतिरिक्तात्मयाथात्म्यवादः
षष्ठः ॥

श्रीः

न्यायकुलिशे

सामानाधिकरण्य वादस्सप्तमः

भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति लक्षण-वाक्यम्। तदिदमसम्बद्धमिव दृश्यते। प्रवृत्तिनिमित्तभेदो ह्यर्थभेदः। कथं तेषामेकस्मिन्नर्थे वृत्तिस्सम्भवति? सा चेदङ्गीकृता कथं निमित्तभेद? इति॥

अत्र केचिदाचक्षते—भिन्नप्रवृत्तिनिमित्तानामपि केषाञ्चिदेकार्थवृत्तित्वं सम्भवति, यथा शुक्लो गौरिति। न चात्रार्थैकत्वासम्भव इति वाच्यम्; निमित्तयोर्मिथो भेदेऽपि विशेष्येणाभेदात्तस्य चैकत्वादेकार्थत्वाविरोधात्। यद्येकवस्तुतादात्म्यं तयोः कथं मिथो भेदः? स चेत्कथमेतत्? न ह्येकस्य विशेष्यमात्रस्य स्वात्मनाऽभिन्नस्य भेदो दृष्ट इति चेत्, सत्यम्; अत्र तु दृश्यत एव। अतो दर्शनबलेन व्याप्तिमवधूय भेदाभेदयोरविरोध-मभ्युपगच्छामः। दृश्यते ह्ययं गौरित्यभेदेन जातिः। अयं शुक्ल इति च गुणः। सामा-नाधिकरण्यार्थ एव निरूप्यत इति चेन्न; प्रत्यक्षोपन्यासात्। यः खल्वयमिति प्रतिभातः पिण्डविशेषः स एव हि गौरिति प्रतिभाति। न च दण्डीत्यादिवद्गोत्वादिविशिष्टे विशेषण-तयैव गोत्वादयश्च भान्तीति वाच्यम्; व्यतिरेकेणानुपलब्धेः। यद्धि विशेषणं दण्डकुण्ड-लादि, तस्मिन्पृथगनुभूयमानेऽपि[१] तद्व्यतिरेकेण पुरुषोऽवगम्यते। (अतः?) तत्र युक्तं व्यति-रेकेणोपलब्धयोर्विशेषणविशेष्ययोस्तथा व्यवस्थापनम्। इह तु यदेवैकदा व्यक्तिरूपेणावसितं, तदेवानन्तरं जातिरूपेणापि नित्यमव (नित्यमवसीयत इत्यव?) (जातिरूपेणापीत्यव?) श्या-भ्युपगमनीयं दर्शनवशादेव द्वैरूप्यम्।

१. तस्य पृथगनुभवकालेऽपीत्यर्थः।

न चात्र दर्शने बाधकं किञ्चित् ज्ञानमुत्पद्यते। गुणजात्योर्भेददर्शनमेव बाधकमिति चेन्न; भिन्नविषयत्वात्[१]। ततोऽनुमानमिति[२] चेन्न; उपलब्धिविरोधात्[३]। गुणगुणिनोरेव भेदोपलम्भो बाधक इति चेन्न; तस्याविरोधापादकस्य बाधकत्वानुपपत्तेः, यथा शुक्लो गौरित्युपलम्भो गोत्वशुक्लत्वयोः। विरोधे सिद्धे बाधक एवेति चेत्, कथमत्र विरोधः? भिन्नाधिकरणत्वनियमात् (इति चेन्न;[४]) न हि घटपटयोरभेदो दृष्टचरः। तर्हि घटस्य स्वात्मना भेद इति चेन्न; व्यतिरेकदृष्टान्तमात्रत्वादस्य विरोधस्थानत्वानुपपत्तेः। तथा शुक्लस्य पटस्यागोत्वं गोः कृष्णस्य चाशुक्लत्वं किं न पश्यसि? गोश्शुक्लस्य चोपलम्भाद्यदि तत्राविरोधनिश्चयः, एवमत्रापि भवान् समदृष्टिस्स्यात्; कृतमभिनिवेशेन॥

तथापि कस्यचित्केनचिद्विरोधः कथं निश्चेय इति चेत्, किमनेनोक्तेन? सौहार्दे तु वदामः। वैयधिकरण्यनियमादुपलम्भमात्रस्य नियमः। शुक्तिकायामपि रजतावभासादर्थस्य क[५] निश्चयः, विपरीतनिश्चयो वेति चेन्न; शुक्तिकायां रजतस्य प्रतिक्षेपात्। नेदं रजतमिति हि तत्र स्फुटः प्रतिक्षेपः। यदि च प्रतिक्षेपमन्तरेण शुक्तिरजतत्वयोरेकत्रावभासः स्यात्, कस्तत्र विरोधमुद्भावयेत्?

१. दर्शनस्य गुणजातिभेदविषयकत्वेऽपि गुणव्यक्तिभेदाविषयकत्वादित्यर्थः।

२. गुणजाती, स्वाश्रयव्यक्तिभिन्ने, मिथो भिन्नत्वादित्यनुमानं बाधकमिति चेदित्यर्थः॥

३. अनुमानमभेदग्राहिप्रत्यक्षबाधितमिति भावः।

४. अत्र 'इति चेन्न' इति अर्थसामञ्जस्याय पूरणीयमिति भाति। तदा चायमर्थः—गुणगुणिनोर्भिन्नाधिकरणत्वनियमाद्विरोध इति चेत्, तर्ह्येकाधिकरणत्वेऽविरोधादभेद इति सिद्ध्यति। एवञ्च घटपटयोः कदाचिदेकाधिकरणत्वादभेदस्स्यात्। ननु एकाधिकरणत्वेऽपि भेदाङ्गीकारे घटस्य स्वात्मनोऽपि भेदस्स्यादिति चेन्न; एकाधिकरणत्वेऽभेद इति नियमभञ्जनार्थं घटपटरूपव्यतिरेकदृष्टान्तकथनात् एकाधिकरणत्वादेर्भेदप्रयोजकत्वस्यास्मदनुक्तत्वादिति। विमृश्य निर्धार्यम्।

५ ऽ.व निश्चय इति पा०.

ननु कोऽयं प्रतिक्षेपः? यदि तत्राभावप्रत्ययः तर्हि तत्र[१] प्रतिपन्न इति भवतामविरोधमर्हतीति चेत्, स्यादेतदेवं, यदि भावनिषेधमन्तरेणाभावस्य रूपान्तरमुपलभ्येत। न तु प्रतियोगिनं प्रत्युदासीनमभावस्य स्वरूपं पश्यामः। भावे तु रूपान्तरेण प्रतिपन्ने सामानाधिकरण्यप्रतीतिवि (रवि?) रोधमेव स्थापयेत्। अन्यथा हि कथञ्चिदेकाधिकरणापेक्षया भावान्तरप्रतिपत्तिरेव पूर्वस्य बाध इत्यापद्येत। [२]भावाभावात्मकावेव भेदाभेदाविति चेन्न; भेदस्य स्वरूपलक्षणस्य भावात्मकत्वात्; अभेदस्यापि तादात्म्यरूपस्याभावत्वानुपपत्तेः। न चेतरेतराभाववत्तामात्रेण विरोधः; अतिप्रसङ्गात्। न चाक्षेपकत्वेन; शुक्तिकारजतत्ववदविनाभावासिद्धेः। अत्रैव प्रत्यक्षेण बाधात्। [३]प्रत्यक्षबलादविनाभावभङ्गस्तद्भङ्गेन तद्बलमिति चेन्न, [४]अनन्यथासिद्धेः प्रत्यक्षस्य। न हि सामान्य[५]मन्यत्र प्रत्येतुं शक्यम्; येन रजतादिवदारोपादिकल्पना स्यात्। न च 'अयं न गौः गौर्वा नायम्' इति बाधः। न चार्थक्रियावतोरनयोर्बाधशङ्कापि सम्भवति। कार्यवर्गस्तत्साजात्यञ्चार्थक्रियेति द्रष्टव्यम्। [६]सामान्यविशेषात्मकञ्च विश्वम्; तद्बाधे किं भविष्यति। अतो भेदाभेदयोरविरोधाज्जातिगुणादयस्स्वाश्रयेण भिन्नाभिन्नाः॥

विशेषणविशेष्यभावाच्च। न खल्वत्यन्तभिन्नयोः क्वचिदपि विशेषणविशेष्यभावा दृश्यते। दण्डी देवदत्त इति दृश्यत इति (चेन्न?) संयोगद्वारको हि तत्र विशेषणविशेष्यभावः; तेनैव चाभिन्नता, संयोगतद्वतोरनतिभेदात्। अत एव चौपाधिकाभेदापगमे

१. तत्रेत्यस्य प्रतिपन्ने, प्रतियोगिमत्तया ज्ञाते इत्यर्थः; इति भवन्मतेऽविरोध एव, प्रतियोग्यभावयोस्सामानाधिकरण्यादिति.

२. तर्हि भेदाभेदयोरपि परस्परनिषेधरूपतया विरोध एवेति शङ्कते—भावेति।

३. अन्योन्याश्रयं शङ्कते—प्रत्यक्षेति।

४. प्रत्यक्षबलमनन्यथासिद्धत्वादेव सिद्धमिति नान्योन्याश्रय इत्याह—अनन्येति.

५. सादृश्यमित्यर्थः

६. अयं गौरित्यत्र जातेर्व्यक्तेर्वा आरोपितत्वस्वीकारे विनिगमनाविरहेण सर्वबाधे किं स्यादित्यर्थः।

विशेषणतावगमः। ननु सम्बन्धाभावादिति चेत्, किमभिन्नानां विशेषणत्वे सम्बन्धित्वं प्रयोजकम्? न तर्हि सम्बन्धः स्वाश्रयं विशिंष्यात्; सम्बन्धान्तराभावात्॥

अस्ति हि समवाय इति चेत् तर्हि समवायीति प्रत्ययो न स्यात्। न हि तस्यापि समवायान्तरमस्ति। स्वपरनिर्वाहकोऽयमिति चेत्, किमयं स्वस्वाश्रयघटकस्स्वयमेव, अथ घटकस्सम्बन्धान्तरात्मा, विशेषणत्वे घटकान्तरनिरपेक्षो वा। नाद्यः; कर्मकर्तृविरोधात्। आकारभेदादात्मवदविरोध इति चेन्न; [१]तस्यापि सम्बन्धान्तरापेक्षायामनवस्था स्यात्। न द्वितीयः; तत्रैव भेदाभेदप्रसङ्गात्। तद्वरं प्रथममेवाभ्युपगमः। एवं हि तत्कल्पना न स्यात्। न च तृतीयः; आदावेव प्रसङ्गादतिप्रसङ्गाच्च।

न स्वभावतो व्यवस्था; एकस्यैव समवायस्यानन्तैस्सम्बन्धिभिर्विरोधेन वैशिष्ट्या-वैशिष्ट्ययोर्निर्वोढुमशक्यत्वात्। नानात्वे चानन्तकल्पना। अतस्तादात्म्यमेव वैशिष्ट्य-निर्वहणाय गत्यन्तराभावादभ्युपेतम्। इदञ्च सर्वत्र साक्षात्परम्परया वा यथासम्भवमूह-नीयम्॥

सहोपलम्भनियमाच्च। न च साहित्यमेकस्यैव सम्भवति। न च नियमः (मतः?) पृथगनुपलम्भलक्षणो भेदो[२] दृश्यते। ननु न पृथगनु (गु?) पलम्भोऽत्यन्तभेदव्यापकः; यत्तन्निवृत्त्याऽत्यन्तभेदनिवृत्तिस्स्यात्; पृथक् सिद्धेरुपाधित्वादिति चेन्न; साधनव्याप-कत्वात्॥

का चेयं पृथक्सिद्धिः? न [३]तावद्भिन्नदेशकालत्वम्; भिन्नदेशानां भिन्नकालानाञ्चा-पृथक्सिद्धिप्रसङ्गात्। न चैकैकम; भिन्नदेशानां भिन्नकालानां वा अपृथक्सिद्धिप्रसङ्गात्।

१. आकारस्यापीत्यर्थः, आकारिणीति शेषः

२. अत्यन्तभेदः नियमेन पृथगनुपलम्भसहचरितो न भवति। भेदे पृथगुपलम्भस्स्यादित्यर्थः.

३. अयं भावः—भिन्नदेशकालोभयकत्वं पृथक्सिद्धिरिति चेत्, देशमात्रभेदे कालमात्रभेदे चा-पृथक्सिद्धिस्स्यात्। भिन्नकालत्वं पृथक्सिद्धिरिति चेत्, देशभेदेऽपृथक्सिद्धिस्स्यात्। भिन्नदेशत्वमिति चेत्, कालभेदे। भिन्नदेशभिन्नकालान्यतरत्वमित्यपि न, सकलविभ्वाद्यपृथक्सिद्धिप्रसङ्गादिति.

नाप्यन्यतरत्वम्; समदेशकालानां विभ्वादीनामपृथक्सिद्धिप्रसङ्गात्। नापि पृथगाश्रयाश्रयित्वम्; गुणत्वादावतिव्याप्तेः। नापि [1]पृथगगतिमत्त्वं तद्विशिष्टं वा; रूपरसयोरव्याप्तेः। न चानाश्रितस्य सत्ता; सा चासम्बन्धयोर्विद्यमानता; सम्बन्धस्यैवाकृत्यादावभावात्। तथा चोपपादितत्वात्। न च विशेषणादिभावमपहायावस्थानम्; विशेषणत्वस्य तादात्म्यनिबन्धनत्वेन तदभावस्य भेदपर्यायत्वात्। भिन्नतयावस्थानमेव पृथक्सिद्धिरिति चेत्, आगतोऽसि मदीयं पन्थानम्। त्यजेदानीमुपाधिव्यसनम्। आत्मानं प्रत्यात्मन एवोपाधित्वायोगात्।

अयमपि गौरिति प्रत्ययाच्च। न ह्ययमिति प्रागननुभूतविशेषोल्लेखोऽन (?) नुभूततया गोत्वेन प्रतिसंधानञ्च केवलभेदेऽभेदे वा घटते। न चैवं व्यक्तिजातिगोचरो (रौ?) भेदाभेदः (दौ?); व्यक्तिश्च जातिश्चेति प्रतीतिप्रसङ्गात्। सम्बन्धे च सति सम्बन्धश्चेति प्रतीतिप्रसङ्गः।

अवयवावयविनोस्समानदेशत्वाच्च। मूर्तद्रव्यमत्यन्तभिन्नमूर्तान्तरोपष्टब्धावकाशमनुपलब्धमित्यवयवसमानदेशोऽवयवी घटस्तदनतिरेकीति लभ्यते।

अनुमानोदयाश्च (याच्च?)। कथमपरथा चार्वाकपरिपाटी पराक्रियेत? न खल्वेकेन प्रतिबन्धोपलम्भेऽपरमनुमेयं भवति; अतिप्रसङ्गात्। न च गृहीतमात्रावधारणायानुमानमिति प्रमाणान्तरमाश्रयणीयम्।

अतो भेदाभेदयोरपि विरोधाश्रयणेनैवमादिविरोधसहस्रपरिहारास्स्वयमूहनीयाः। अत एव जातिगुणादिनिमित्तानां शब्दानामसङ्कोचेनैकार्थवृत्तित्वं सम्भवत्येवेति॥

अत्रोच्यते—

प्रत्यक्षं तावद्भिन्नाभिन्नगोचरमिति न पश्यामः।

१. पृथग्वृत्तिमत्त्वम् पा०.

एकैकस्मिन्विशिष्टे वा बुद्धिर्जात्यादितद्वतोः ।
भिन्नाभिन्नत्वमन्योन्यं न समर्थयितुं क्षमा ॥

तथा हि—न तावदेकैकालम्बना बुद्धिर्भेदाभेदव्यवस्थापनाय पर्याप्ता ; तत्तन्मात्रमग्नत्वादर्थान्तरे व्यापाराभावात् । यद्यपि तत्त्वतो निराश्रयजात्यादिमात्रालम्बना निर्धर्मकधर्मिमात्रावगाहिनी च न काचित्प्रत्यक्षा बुद्धिश्चकास्ति ; तथापि तत्तदंशमाकृष्येयं व्यावर्ण्यते । न हि तत्र जातिमात्रस्फुरणे व्यक्तितादात्म्यप्रकाशस्सम्भाव्यते ; जातिमात्रगोचरत्वव्याघातात् । एवं व्यक्तिमात्रस्फुरणांशेऽपि द्रष्टव्यम् ।

ननु जातिरूपान्तर्गता व्यक्तिः, तत्स्वरूपान्तर्गता च जातिः तत एवान्यतरप्रतिभास एवेतरमिश्रगोचर इति चेन्न ; प्रतीतिस्वरूपमपहाय तथाकल्पनानुपपत्तेः । इतरेतरान्तर्भावे मिश्रगोचरत्वम्, मिश्रगोचरत्वे चान्तर्भाव इत्यन्योन्याश्रयापत्तेः । एकैकस्वरूपस्यैव व्यतिरिक्तप्रतियोगितया स्वात्मनो भेदात्मकत्वात्तत्रैव तदभेदप्रकाशानुपपत्तेश्च । उपपत्तौ विश्वात्मतैव स्यात् । तथापि जातिसंविदो व्यक्तिविषयः कटाक्षः कश्चिदुन्नेयः, येन तत्रैव वेदनमुपपद्यत इति चेत्, अहो भवतां संविदभिप्रायरहस्यवेदनम् ; यत् स्फुरणस्वरूपमपहायार्थसम्बन्धमस्यास्स्वगतमध्यवस्यति (न्ति?) तत्रैव वेदनन्तु तत्रैव तस्यास्सत्त्वात् । न ह्यन्यत्र विद्यमाना जात्यादयोऽन्यत्र प्रत्यक्षेणानुभवितुं शक्याः । स्फुरणं त्वर्थान्तरवत्परस्परमपि भेदं प्रतिपादयत्येवेत्युक्तम् । तत एव भेदाभ्युपगमः, अभेदस्तु यदेव वस्तु जात्यात्मना पूर्वं गृहीतं तस्यैव पश्चाद्व्यक्त्यात्मनोपलम्भादिति चेन्न ; तस्यैवेत्यत्र प्रमाणाभावात् । प्रत्युत न तस्यैवेत्येव हि स्फुरणमुन्नीतम् । तथापि यदि तस्यैवेति न स्यात्, तर्हि तदानीं योग्यानुपलब्ध्या निरासः प्रसज्यत इति चेन्न ; तुल्यत्वात् । न तावदेकज्ञानवेद्ययोरंशस्य योग्यानुपलम्भस्सम्भवति ; उपलम्भविरोधात् । क्रमेणोपलम्भे तु भवतोऽपि तुल्यम् । आकारभेदप्रकाशाभ्युपगमादेकाकारोपलम्भवेलायामाकारान्तरस्य प्रकाशाभावेन निरासप्रसङ्गात । एकतरमग्नत्वादपरस्यानिरास इति चेन्न ; साक्षादनुपपत्तेः (दनुवृत्तेः?) न हि व्यक्तिस्साक्षादनुवृत्तिपदम्, जातिर्वा व्यावृत्तः (त्ता?), उन्मज्जनाभावप्रसङ्गात् । अथ तत्र सहकारिसन्निधानम्, सन्तु वा सहस्रं विरोधाः, स्फुरणं तु न तस्यैवेति दुरपह्नवम् । इतरथा सर्वस्य सर्वविषयत्वप्रसङ्गात् ।

यत्तु न सामान्यरूपं विशेषरूपं वा निर्विकल्पके चकास्ति, सम्मुग्धमेव भिन्नाभिन्नवस्तु भासत इति वदन्ति; तदतिस्थवीयः, विकल्पमन्तरेण तत्र भिन्नाभिन्नगोचरत्वस्य व्यवस्थापयितुमशक्यत्वात्। यद्धि विकल्पेन विविच्यते, तदेव हि पूर्वमपि गृहीतमिति वक्तव्यम्। अन्यथा अतिप्रसङ्गात्। तत्रैतावान्विशेषः—सविकल्पकेन सप्रकारं गृह्यते प्राङ्न तथेति। इदञ्चान्वारुह्य वचनम्। परमार्थतस्त्वविशिष्टालम्बनं न किञ्चिदपि विज्ञानं भवतीति।

स्यादेतत्। यद्यप्येकैकस्फुरणं न शबलप्रकाशनसमर्थमिति न तेन तत्सिद्धिः, तथाप्ययं गौरिति विशिष्टविषयकमेकं विज्ञानमनन्यथासिद्धेर्भेदाभेदमनयोरावेदयतीति। नैतत्सारम्। यतः—

> विशेषणविशेष्यत्वे भिन्नाधिकरणे स्फुटम्।
> विशिष्टत्वं कथं न स्यादभेदे धर्मधर्मिणोः॥

विशेषणविशेष्यातिरेकि न विशिष्टं नाम किञ्चिद्वस्त्वस्ति। ते तु मिथो भिन्ने संहत्य विशिष्टतया अनुभूयेते। न च संहतिरित्यर्थान्तरम्। तथाप्यनयोरभेदासिद्धेश्चा (द्धेः,[1] असिद्धेश्च। अ?) नयोरेवाभिन्नं रूपं संहतिरिति चेन्न; दण्डकुण्डलादेरपि तथाभावप्रसङ्गात्। न हि त्वन्मतेऽपि तत्र साक्षादभेदः। विशेषणत्वं तु साक्षात्। ज्ञानादीनामर्थेन तादात्म्यप्रसङ्गाच्च। अत एव न तादात्म्याद्विशेषणत्वम्। न च जातिस्वात्मनो विशेषणं विशेष्यं वा भवतीति दृष्टम्। न च तथात्वे किं कस्य विशेषणमिति व्यवस्था सिद्ध्यति। अतस्स्वभावादेव कस्यचित्प्रतिपन्नगुणभावेन यत्प्रतीयमानमुपयुज्यते तत्तस्य विशेषणमिति। इतरत्त्वद्योगा[2]दपाक्षिकमिति। एतावता तयोः परस्परमेकप्रतिपत्तावन्तर्भूतयोरुपकार्योपकारिभावमात्रं सिद्ध्येत्; न त्वभेदसम्भावनागन्धोऽपि।

१. संहतेरर्थान्तरत्वेऽपि न विशेषणविशेष्याभेदसिद्धिः। वस्तुतस्तदर्थान्तरत्वमेवासिद्धमित्यर्थे इयं पङ्क्तिस्स्यात्। शङ्कते—अनयोरिति।

२. इतरत्त्वयोगा. पा०

ननु दण्डादिषु विशेषणत्वमात्रं जात्यादौ तु तादात्म्यमपि प्रतीयते। इतरथा तच्छब्दे मत्वर्थीयप्रत्ययनिर्देशस्स्यादिति चेन्न; प्रतिबन्धासिद्धेः। पृथक्सिद्धेरुपाधित्वात्। यद्धि यद्विशेषणतैकस्वरूपं तेन तदपृथक्सिद्धम्; इतरत्पृथक्सिद्धमिति विवेकः। अपृथक्सिद्धमपि कर्म जात्यादिकं वा कदाचिन्मत्वर्थीयप्रत्ययापेक्षमिति चेत्, अभिन्नमपि तथेति तुल्यम्। नियमराहित्यमेव विवक्षितम्; तच्चाभिन्नेषु केषुचिदनपेक्षत्वदर्शनमात्रेण सिद्ध्यतीति चेत्, तर्ह्यपृथक्सिद्धेष्वित्यपि तुल्यम्। न च भिन्नत्वादपेक्षानियमादभि (मः; भि?) न्नेष्वपि शरीरेषु तदनपेक्षत्वदर्शनात्। न च तत्र गङ्गादिपदवल्लक्षणेति वाच्यम्; मनुष्यश्शरीरमिति सामानाधिकरण्यप्रसङ्गात्। यश्चापि तथा प्रयुङ्क्ते, सोऽपि निष्कर्षविवक्षया। ततोऽपि मनुष्यो ज्ञातेत्येवमादिप्रकारैरात्मसामानाधिकरण्यमेव दृश्यते। तथा देवत्वं मनुष्यत्वमिति निष्कर्षदर्शनाच्च। न हि लाक्षणिकशब्दानां लक्ष्यार्थ (र्थः?) तत्सम्बन्धो वार्थाल्लभ्यो निष्कृष्यमाणो दृश्यते। अतो भेदो विशेषणतावगमयोग्यतेत्येव वक्तुं युक्तम्। ननु (तु?) तादात्म्ये किञ्चित्प्रयोजनं पश्यामः।

एतदुक्तं भवति—विशेषणं द्विविधं, स्वाभाविकं तदुपाधिकञ्च। तत्र स्वाभाविकवाचकत्वं (चकं?) द्विविधं, निष्कर्षकमनिष्कर्षकञ्च। तत्र निष्कर्षकं विशेषणोपाधिकञ्च वाचकं मत्वर्थीयापेक्षम्; इतरत्तदनपेक्षमिति नात्र कश्चिद्भेदाभेदोपयोग इति। अत एव विशेषणविशेष्यभावाच्चेत्यनुमानं निरस्तम्।

यदि च प्रत्यक्षेण भेदाभेदावेकाधिकरणतया प्रतिपन्नौ, तथापि तयोरन्यतरेणेतरबाधान्नोभयप्रामाण्यमध्यवसितुं युक्तम्। यत्त्वविरोधादबाधनमिति, तन्न; भेदाभेदयोरितरेतराभावात्मकत्वान्नेदं रजतमितिवद्विरोधस्य दुर्वारत्वात्। विलक्षणत्वं भेदः, तदभावोऽभेद इति हि सम्प्रदायः। यद्यप्युभयमर्थान्तरम्, तथापि विरोधो दुष्परिहरः।

तादात्म्यमभेद इति चेन्न; तादात्म्यश (त्म्याभेदश?) ब्दयोर्भेदाभावविवक्षामन्तरेण पुनरुक्तयोरर्थान्तराभावात्। न हि भेदमपहाय गोत्वाश्वत्वयोस्तादात्म्यविरोधे निबन्धनं किञ्चिदुपलभ्यते। बहिरेवं न त्वत्रेति चेन्न; नियामकाभावात्। शौक्ल्यदैर्घ्यादिषु बहिरपि तथा विरोधानुपलब्धेः। क्वचिद्विरोधितायां सामान्यतस्सिद्धौ सर्वत्र तत्स्वभावानपायात्।

वैजात्यं (त्यात्?) नियम इति चेत्, कुत एतत्?। अत्र सामानाधिकरण्यादिति चेत्, शुक्तिरजतत्वादावपि तथाभावप्रसङ्गात्। वैजात्ये वा (चा?) विरोधः; अविरोधे च वैजात्यमिति परस्पराश्रयणञ्च। न हि रूपान्तरेण वैजात्यमुपलभ्यते। किञ्च—

तत्रेतरेतराभावो यत्र भेदः प्रतिष्ठितः।
तत्र चेत्स्यादभेदोऽपि स्वयं स्वाभावभाग्भवेत्॥

न च भेदे सत्यपीतरेतराभावो नास्तीति वाच्यम्; व्यक्तौ रजतारोपो न शुक्तिकायामिति विवेकस्य विलयप्रसङ्गात्। ततश्च....[इतरेतराभा]वभाजोर्जातितद्वतोर्मिथस्तादात्म्ये स्वयमेव स्वाभावभाजनमिति भावाभावयोरविरोधस्स्यात्।

१ततस्सामानाधिकरण्यप्रतीतावपि नाविरोधसिद्धिः। आकारभेदादविरोधसिद्धिरनवस्थादुस्था॥

यत्तु जातिव्यक्त्योरन्यत्राप्रतीतेरत्यन्तबाधः प्रसज्यत इति, तत्रोत्तरम्—कस्तयोर्बाधमारचयति? न हि वयं जातिं व्यक्तिं वा बाधामहे; किन्तु तयोस्तादात्म्यम्। प्रतीतिश्च तयोरेकत्रैव देशे भवतु कामम्; अविरोधित्वात्; नैतावता तादात्म्यमिति।

यत्तु सहोपलम्भनियमादिति, तन्न; विरुद्धत्वात्। साहित्यस्यात्यन्तभिन्नैकनिष्ठत्वात्। तद्गोचरस्य नियमस्य च तत्स्थापकत्वमेव। पृथगनुपलम्भस्तन्नियम इति चेत्, तत्रेदं विकल्पनीयम्—स किं भिन्नाकारतया ग्रहणाभावः, अथ भिन्नाश्रयतया, आहोस्विद्भिन्नप्रदेशतया, उत ज्ञानद्वयेन, प्रत्यक्षेण विशेषणविशेष्यभावमपहायेति वा। तत्र नाद्यः पक्षः; असिद्धत्वात्। सिद्धौ वा भेदविरोधात्। न हि भिन्नानामपि भिन्नकारण (भिन्नाकारेण?) बुद्ध्यभावः। न द्वितीयः; तत एव। न हि जात्यादिसामानाधिकरण्या (समानाधिकरणा?) व्यक्त्यादयः; जातिगुणयोर्मिथस्तादात्म्यप्रसङ्गाच्च। न तृतीयः; एकप्रदेशवर्तिनामाकाशकालादीनां भेद(नामभेद?)प्रसङ्गात्। ज्ञेयभेदस्य ज्ञानभेदं प्रत्यप्रयोजकत्वेन चतुर्थोऽपि

१. क्वचिद्विरोधितायामिति पूर्वोक्तमुपसंहरति—तत इति.

पक्षोऽनादरणीय एव। पञ्चमस्तु विरुद्धः; विशेषणविशेष्यभावस्य भेद एवोपपत्तिरित्युक्तत्वात्। तथा सोपाधिकः। न खलु तादात्म्याभावाद्घटपटौ पृथगुपलभ्येते; अपि तु पृथगवस्थानात्। तदपि तादात्म्याभावेन साधयाम इति चेन्न; भेदेन प्रतिपन्नयोरपि गुणगुणिनोः पृथगनवस्थानसिद्धौ तत्र पृथगुपलब्धेरेवोपाधित्वात्। ततश्शङ्कितोपाधित्वं वा। अतस्तादात्म्याभावस्य पृथगुपलम्भेन व्याप्त्यभावात्कथं पृथगनुपलम्भेनाभेदसिद्धिः। तादात्म्याभावस्थानेऽत्यन्तभेदपदप्रयोगेऽप्ययमेव न्यायोऽनुसन्धेयः।

अयमपि गौरिति तु प्रतिसन्धानमेकोपाधिविशिष्टवदेकजातिवैशिष्ट्यादुपपद्यते। अयं गौरिति सामानाधिकरण्यं विशेषणविशेष्ययोर्भेद एवोपपद्यत इति ह्युक्तम्।

यच्चावयवावयविनोः (नोरिति?) भेदेऽप्यभेदसाधनायोपन्यस्तम्, तद्भेदानभ्युपगमादेव परिहरणीयम्। न हि वयमन्योन्यसंश्लेषविशेषभाजमवयवकलापमन्तरेणावयविनमपरमभ्युपगच्छामः। अभ्युपगमे वा ये वाभ्युपगच्छन्ति, तेषाममूर्तत्वसमानदेशत्वयोर्विरोधोऽन्यत्रेति व्यवस्थापनीयम्। न च भेदाभेदपक्षेऽपि समाधानमन्यथा सम्भवति; भेदांशे विरोधस्यावर्जनीयत्वात्।

अनुमानोदयान्यथानुपपत्तिरपि नात्र भेदं साधयितुमर्हति। सामान्यविशेषयोर्विशेषणविशेष्यभावेनैवोपपत्तेरतिप्रसङ्गः खल्वेवमेव परिहर्तुं शक्यते। यश्चैषां कश्चिदुद्घोषः—एकैकत्र प्रसक्ता दोषा न समुच्चये सम्भवन्तीति—तदपहास्यम्; उभयदोषोपसंहारस्यैव सिद्धेः।

तदेवं भेदाभेदयोरविरोधः प्रमाणपथपरिभ्रष्ट इति कथमेतदवलम्बनेन सामानाधिकरण्यम्?

अन्ये तु वदन्ति—समानाधिकरणं वाक्यमखण्डार्थं प्रतिपादयति। अपरथा कथमेकार्थवृत्तित्वम्? न तावत्प्रवृत्तिनिमित्तमेकम्, पर्यायत्वप्रसङ्गात्। न च तद्विशिष्टम्; विशेषणभेदेन विशिष्टताभेदात्। नापि प्रधानार्थैकत्वम्; व्यधिकरणवाक्यस्यैव तथात्वात्। ननु लक्षणवाक्यस्थप्रवृत्तिनिमित्तभेदपरित्यागेनैकार्थत्वनिबन्धनः (न्धः?) किङ्कृत इति?

अहो भवतां लक्षणवाक्यार्थाभिज्ञता ! न खल्वस्मिन्वाक्ये प्रवृत्तिनिमित्तभेदोऽर्थत्वेन विवक्षितः ; एकार्थवृत्तित्वविरोधात् ; अपि तु पर्यायपदव्यावृत्त्यर्थः । भिन्नप्रवृत्तिनिमित्तत्वेन व्युत्पन्नानां शब्दानां यत्रैकार्थवृत्तित्वं तत्र सामानाधिकरण्यमिति लक्षणवाक्यार्थः । न चैकार्थतैव सर्वथा हेया ; एकवाक्यताविरोधात् । एवमेकार्थवृत्तित्वविधानात्पर्यायत्वमेव प्रसज्यत इति चेत् , स्यादेतदेवम् , यदि समभिव्याहारलब्धैकार्थत्वात्पर्यायत्वमुच्यते । व्युत्पत्तिलब्धात्तु तत् । तथापि किं पर्यायव्यवच्छेदेन । एवमप्येकार्थवृत्तिसिद्धेरिति चेन्न ; (यतः?) फलभेदः । न हि घटः कुण्ड इति पदद्वयप्रयोगे प्रतिपदं प्रयोजनभेद उपलभ्यते । नीलमुत्पलमित्यत्र-त्वनीलानुत्पलव्यावृत्तिलक्षणफलोपलम्भादपर्यायत्वं बहुमन्यामहे । न चैतावता अर्थभेदापातः। यदि च पदान्तरं न प्रयुज्येत, विशेषणान्तरान्वयस्स्यात् । तत्परिहाराय तत्प्रयोगः । यदि च निमित्तविवक्षा आश्रीयेत, ततो विशेषणविशेष्यभावेनान्वये जातिगुणादीनामन्योन्यसमवाय-स्स्यात् । एकपदोपात्तस्य ह्यन्येन विशेषणम् । अतश्च निमित्तानादरः । यद्यपि नीलमुत्पल-मित्यत्र निमित्तभूतविशेषणान्वयः प्रतीयते, तथापि नासौ शब्दशक्तिकृतः । प्रमाणान्तर-सिद्धस्य तु शब्देना (ब्देन?) बाधमारचयति, अन्यपरत्वात् । यथा गामनयेत्युक्ते तद्गतगुण-जात्यन्तरेष्वपि प्रतिलब्धानयनेषु गोत्वातिरेकी न शब्दार्थः ॥

अत एव हि सत्यज्ञानादिवेदान्तवाक्येषु शब्दैकसमधिगम्यमखण्डैकरसं ब्रह्म सिद्ध्यति । तत्र हि जगत्कारणतयोपलक्षितस्य 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति सजातीयविजातीयस्वगतनानात्वरहितस्य कारणत्वकृतविकाराश्रयत्वादिदोषपरिजि-हीर्षया स्वरूपशोधनाय प्रवृत्तानि निष्प्रत्यूहमखण्डवाक्यार्थं बोधयन्त्येव साक्षादपि च कति-चिन्निषेधन्ति निश्शेषमभेदजातम् ॥ अतश्शोधकवाक्यान्तरानुरोधात् , कारणवाक्यैकार्थ्यात् , सामानाधिकरण्यस्वाभाव्याच्च शब्दैकसमधिगम्यं ब्रह्म सत्यज्ञानादिवाक्यैर्निश्शेषविशेषशून्य-मेवेति ज्ञायते । न च तत्तन्निषेधवशादभावरूपविशेषणसमुन्मेषप्रसङ्गः ; अशेषभावनिषेधेऽ-भावस्यापि तत्त्वता निवृत्तेः । भावप्रतियोगिको ह्यभावः । स च भावस्य क्वचिद्वृत्तावास्पदं लभते । इह तु सर्वथा सर्वभावेषु विलीनेषु को निषेधार्थ इति ?

अत्रोच्यते—

एकोक्तानतिरेकश्चेन्निष्फलं स्यात्पदान्तरम् ।
अतिरेके कथन्नु स्यादखण्डार्थाभिधायिता ॥

यदि हि नीलमुत्पलमित्यादिपदेष्वेकपदप्रतिपन्नात्पदान्तरप्रतिपन्नं नातिरिच्येत, ततो निष्फलमेव पदान्तरमापद्येत ।

यदुक्तं व्यावृत्तिभेदः फलमिति, तन्न ; व्यावर्त्यभेदाभावात् । तदभेदश्च प्रतिपाद्यभेदाभावात् । प्रतिपाद्यप्रतियोगी हि व्यावृत्तो युक्तः ; अन्यथा अतिप्रसङ्गात् । यदि च नीलपदस्य नीलिमविशिष्टार्थो न विवक्षितः, किमित्यनीलव्यावृत्तिरेव फलति । नीलपीतसाधारणं हि विशेष्यम् । ततोऽपीतव्यावृत्तिरपि फलमित्यापद्येत । अविवक्षितमपि यमर्थं स्मारयति तत्प्रतिव्या (तियोगि व्या?) वर्तत इति चेत् , तर्हि गौश्शुक्ल इत्युक्ते दशानामपि प्रतियोगिनो व्यावर्त्या भवेयुः । व्याघातादेक एवेति चेन्न ; निमित्ताविवक्षायामव्याघातात् । तद्विवक्षायां हि सास्नादिमत्त्वबाणत्वादेरेकत्र विरोधः । अविवक्षायान्तु सास्नादिमतामबाणादीनाञ्च[1] केषाञ्चित्संभवात्तद्व्यवच्छेदो युज्यत एव ॥

निश्शेषव्यवच्छेदप्रतियोगिव्यवच्छेदो दुर्भणः । [2]स च विवक्षितः । तस्मादसमुच्चय इति चेन्न ; भवत्पक्षे तदसम्भवः । न ह्यखण्डवाक्यार्थपक्षे नीलपदस्य सकलानीलव्यवच्छिन्नार्थता सम्भवति ; तस्यापि वाक्यार्थस्य नीलगुणत्वाभावेनानीलत्वात्तद्व्यवच्छेदस्य तस्मिन्ननुपपत्तेः । यद्यपि प्रमाणान्तरगम्येषु नीलादिषु लोके वैशिष्ट्यावगमात्प्रतियोगित्वाभावः , तथापि वेदे शब्दैकसमधिगम्यस्स खल्वखण्डार्थस्सकलविशेषशून्य इति सर्वपदव्यवच्छेद्यतामर्हतीति कथं तत्तत्पदार्थत्वम् । अतस्तत्तन्निमित्ताविवक्षायामेकार्थ एव न सिद्ध्यति ।

१. सास्नादिमतां बाणादीनां पा०

२. व्यवच्छेदप्रतियोगिनां सर्वेषां व्यवच्छेदोऽत्र विवक्षितः। तत्र अनीलव्यवच्छेदापीतव्यवच्छेदादिसर्वव्यवच्छेदग्रहणे तत्प्रतियोगिसामान्यव्यवच्छेदो दुर्वच इत्यनीलसामान्यव्यवच्छेदपरत्वमित्यर्थः ॥

अथ तस्यार्थत्वादव्यवच्छेद्यत्वम्; त्यज तर्हि निश्शेषव्यवच्छेदव्यसनम्। सर्वेषाञ्च समानाधिकरणवाक्यानामेक एवार्थः परस्परार्थव्यत्ययो वेत्यापद्येत। निमित्तविरोधाविरोधयोरविशेषेण घटः पट इति सामानाधिकरण्यं प्रसज्येत।

व्यधिकरणवाक्यस्थानाञ्च पदानामेकार्थविवक्षा किमिति नाश्रीयेत। न च प्रकृत्यर्थातिरिक्तप्रत्ययार्थविरोधादैकार्थ्यं व्यधिकरणवाक्येषु न सिद्ध्यतीति वाच्यम्; ऐकार्थ्यविरुद्धानामशेषाणां त्याज्यत्वेन निर्णयात्। त्यागमन्तरेणैकार्थ्यमेव न सिद्ध्यतीति चेन्न; न हि समानाधिकरणवाक्यान्यपि तथा न स्युः। तथाप्यैकार्थ्यं यत्प्रकारजुषां व्युत्पत्तिसिद्धं, तत्प्रकारजुषामेव तदभ्युपगन्तव्यमिति चेन्न; भवद्विवक्षितैकार्थ्यस्य प्रमाणान्तरागोचरत्वात्। प्रमाणान्तरगोचरत्वेऽपि व्युत्पत्त्यगोचरत्वात्। न हि समानाधिकरणवाक्यप्रतिपाद्यं तत्तन्निमित्तविरहीति क्वचिदुपलब्धम्। न च प्रमाणान्तरागोचरेऽपि जायमानं 'विन्ध्याटव्यां मदमुदितो मातङ्गगणस्तिष्ठति' इति वाक्यात् ज्ञानमविशिष्टविषयं दृष्टम्। अतो व्युत्पत्त्यनुसारेण वाक्यार्थनिर्णयस्तत्तन्निमित्तविशिष्टतयैव। अपरथा अतिप्रसङ्गः॥

अपि च भावाभावयोरितरनिषेधात्मकत्वादनीलनिषेधो नीलमेवेति नीलमविवक्षितम्, अनीलनिषेधस्तु विवक्षित इति व्याहतं को नामान्योऽभिदध्यात् ऋते देवानां प्रियात्? यदि च तत्तन्निमित्तप्रतियोगिव्यवच्छेदं फलमभिलष्यते, तर्हि तत्तद्व्यवच्छेदविशिष्टस्यार्थस्य प्रतियोगिव्यवच्छेदत्वं (?) भेदादेकार्थता व्याहन्येतैव.

अथ विशेष्यमात्रत्वाद्व्यावृत्तीनां न भेदशङ्कावकाशः, तर्हि तन्मात्रस्य प्रथमपदेनैव सिद्धत्वान्निष्फलमेव पदान्तरमापद्येत। यदि च तस्याशब्दार्थत्वं, तदानीं शब्दस्य तदेव निष्फलत्वम्। अथ तस्य व्यवच्छिन्नरूपस्य लक्ष्यत्वेन मुख्यार्थभेदाभावादेकार्थतेति मतम्, तर्हि लक्ष्यस्य धर्मिणो मुख्यार्थत्वाभावादेकार्थतापि न सिद्ध्येत्; निमित्तमुख्यानुसारित्वात्तन्मुख्यत्वस्य, यथा सिंहो देवदत्तः, यथा वा त्वत्पृष्टः पुरुषः स्थाणुः इत्यादिषु॥

अथवा (?) व्यवच्छेद्यस्य कुत्रचिदपि पारमार्थिकत्वाभावात्तत्प्रतियोगिनो[1] व्यव-

१. तत्प्रतियोगिकस्य व्यवच्छेदस्य.

च्छेद्य (च्छेद?) स्यापि पारमार्थिकत्वानुपपत्तेरर्थभेदानापादकत्वम्, तर्हि प्रवृत्तिनिमित्तेन किमपराद्धम्? यत् तदपनुद्यते।

एवं समानाधिकरणवाक्यार्थमपि वाक्यार्थान्तरवद्विशिष्टमेवोपगम्य पश्चात्सर्वमिथ्यात्वमुपपाद्यताम्; किमनेनैकार्थग्रहणेन। न चाभावस्य स्वगतविशेषाभावादविशेषकत्वमिति; स्वगतविशेषाभावे तद्विशिष्टस्यैव व्यावृत्तेस्स्वरूपभेदमात्रेणैव विशेषकत्वानपायात्। न च विशेषणत्वमपि तत एव निवर्तत इति वक्तव्यम्; विशेषणत्वस्य विशिष्टतापेक्षायामनवस्थाप्रसङ्गात्। इष्ट एवायमर्थ इति चेत्, अभावेऽपि तथेष्यताम्; स्वरूपभेदस्य प्रतिसम्बन्धिविशिष्टत्वेन वक्तुं शक्यत्वात्। न च[1] स्वसमवेतमिव (मेव?) विशेषणमित्यभ्युपगम्यैवमेषितुं शक्यम्। न च भावान्तराभाववादिनामर्थान्तराभावाद्विशिष्टता न स्यादिति वाच्यम्; अभावाख्येन भावभेदेनैव विशेषणतापत्तेः। अतस्सामानाधिकरण्यं सर्वथा विशिष्टपरमेव। यदि परममुख्यार्थव्यतिक्रमो लक्षणाभ्युपगमश्च भवतामभिरुचितः, ततो व्यावृत्तिलक्षणा आश्रीयताम्। एवमाद्यभिसन्धायोक्तं **भगवद्भाष्यकारपादैः**—'इयांस्तु विशेषः एकस्मिन्पक्षे पदानां मुख्यार्थता, अपरस्मिंश्च तेषां लक्षणा' इति।

किञ्च लक्षणवाक्यसिद्धयोर्निमित्तभेदैकार्थ्ययोरन्यतरत्र किं (?) कुतो भवतां पक्षपातः?। विरोधादिति चेत्; निमित्तभेदविरोधादेकार्थतैवाप्रामाणिकी हीयताम्। किमव्युत्पत्तिसिद्धनिमित्तत्यागेन?[2] कश्चात्र विरोधः? किमेकार्थवत्प्रवृत्तिनिमित्तभेदयोः,[3] अथ गुणजात्योः परस्परसमवायप्रसङ्गलक्षणः, किं वा निमित्तयोरेव। नाद्यः; अन्यगतभेदस्यान्यगताभेदेनाविरोधात्। विशेष्याभेदेनैकार्थत्वमिति विवक्षितत्वात्। न च तत्तद्विशेषणविशिष्टत्वरूपस्यैकत्वानुपपत्तिदोष इति वाच्यम्; विशिष्टत्वं हि विशेषणसम्बन्धः, कथं तद्भेदस्य

१. स्वसमवेतमेव विशेषणमिति नेत्यभ्युपगम्य प्रतिसम्बन्धिविशिष्टत्वेनापि स्वरूपभेद एषितुं शक्य इत्यर्थः।

२. निमित्तत्यागो व्युत्पत्तिसिद्धो नेति किं तत्करणेनेत्यर्थः। अव्युत्पत्तीत्यत्र व्युत्पत्तीति वा पाठस्स्यात्।

३. एकार्थसम्बन्धिनी ये प्रवृत्तिनिमित्ते तद्गतयोर्मिथो भेदयोर्विरोधः किमित्यर्थः।

विशेष्यभेदापादकत्वम्। तदेकत्वे च विशिष्टभेदाभावः, प्रधानगोचरत्वाद्विशिष्टशब्दस्य। न च शब्दस्य विशिष्टाभिधानं विरुद्धम्; निमित्तविशिष्ट एव व्युत्पत्तेस्तदभाव एवाभिधानविरोधात्। न द्वितीयः; विशेषणानां विशेष्यनिष्ठत्वापेक्षणात्। न ह्यन्यसमवायस्यान्यविशेषणत्वोपयोगः; अतिप्रसङ्गात्। न च गुणजात्योरेव मिथो विशेषणत्वम्; तथा अप्रतिपत्तेः। तथात्वे चानिष्टत्वाभावात्। न च शाब्दे व्यवहारे परस्परसमवायप्रसङ्ग इति वाच्यम्; प्रसञ्जकाभावात्। [1]न हि शब्दस्य विशेषणत्वं तथात्वेनेति क्वचिद्दृष्टम्। तदा वा कृतं विवादेन; दर्शनबलादविरोधोपपत्तेः। तस्मादेकेन पदेनोपस्थापितस्य विशेष्यस्यान्यानि विशेषणानि भवन्ति; न सर्वस्य। अत एव ह्याकाङ्क्षादित्रयं कारणमन्वयस्येति वदन्ति नीतिविदः। न च तृतीयः; समानाधिकरणपदोपात्तानां नीलत्वोत्पलत्वादीनामेकाश्रयसम्बन्धे विरोधाभावात्।

नापि सोऽयं देवदत्त इत्यादिषु विरोधश्शङ्कनीयः; तदेककाल (तद्देशकाल?) (तदेतत्काल?) (तदिदङ्काल?) योर्देवदत्तसम्बन्धाविरोधात्। इतरथा क्षणभङ्गप्रसङ्गात्। इदानीं तत्कालसम्बन्धो विरुद्ध इति चेत्, किमिदानीमस्यापि कालस्य संयोगः? न हि कालस्य कालान्तरापेक्षा; अनवस्थानात्। यत्रापि विरोधः, तत्रापि तयोरन्यतरस्यैव बाधो युक्तः। ....[न हि] पुरुषस्स्थाणुरित्युक्ते द्वयोरपि बाधो दृश्यते।

अपि चात्र प्रवृत्तिनिमित्तव्यतिरेकेण शा(श?)ब्दस्याभिधाने[2] व्युत्पत्तिनैरपेक्ष्यं प्रसज्येत। ततश्च समानाधिकरणवाक्यबलाना(वाक्यं बालाना?)मखण्डार्थमवबोधयेत्। एवं तावल्लोके विशिष्टगोचरत्वम्। वेदेऽपि तथा अभ्युपगन्तव्यम्; लोकवेदाधिकरणन्यायात्। तथा च सत्यज्ञानादिवाक्येषु व्यावृत्तिलक्षणा न सङ्गच्छते।

न च कारणवाक्यैकार्थ्ये सिद्धेऽखण्डार्थत्वं न्याय्यम्; एतद्वाक्यानुरोधेन तेषामेव विशिष्टार्थत्वोपपत्तेः। न च तेषामप्यद्वैतपरत्वम्; न हि निखिलजगन्निमित्तोपादानभावोप-

१. शब्दाधीनं विशेषणत्वं परस्परसमवाये सत्येवेति न दृष्टमित्यर्थः।

२. अभिधायकत्व इत्यर्थः

योगितया ज्ञानशक्त्यादिगुणसागरीभूतं निखिलचेतनाचेतनशरीरकं परमात्मानमभिदधद्वाक्यं निर्विशेषपरमिति युक्तं वक्तुम्। न च शोधकवाक्यान्तरेण निर्विशेषत्वसिद्धिः; निषेधस्य सामान्यगोचरस्य विहितविशेषव्यतिरिक्तगोचरत्वात्, विशेषनिषेधसमानविषयत्वाच्च। तथा हि नीतिविदो वदन्ति।

तस्मात्समानाधिकरणवाक्यार्थोऽन्यथा वर्णनीयः। स उच्यते—अयमत्र तावल्लक्षण-वाक्यार्थः, प्रवृत्तिरभिधानं तस्य निमित्तं कारणम्। शब्दाः खलु कस्मिंश्चिदर्थे वर्तितुं निमित्ततया किञ्चित्सामान्यमवलम्बन्ते। एतदुक्तं भवति—शब्दानां वाच्योऽर्थो द्विविधः, द्वारभूतः उद्देश्यश्च। वृद्धव्यवहारे व्युत्पन्नानां व्यवहाराय प्रयुज्यमानानाञ्च तेषां व्यवहार्ये द्वारिणि प्राधान्येन वृत्तिः। द्वारभूते जात्यादौ तदवच्छेदायानन्त्यव्यवहा(व्यभिचा?)रपरिहाराय च तदर्थतयेति[१]। तत्प्रवृत्तिनिमित्तं भिन्नं येषां, तेषामेकस्मिन्नर्थे वृत्तिर्यमभिधातुर्नि (तुं नि?) मित्तान्वेषणं तस्मिन्नेकस्मिन्नित्यर्थः। तत्र प्रवृत्तिस्सामानाधिकरण्यमिति। अत्र भिन्नप्रवृत्ति-निमित्तानामिति पर्यायपदव्युदासः। एकस्मिन्नर्थे वृत्तिरिति व्यधिकरणानामिति। एवं तावल्लक्षणवाक्यं समञ्जसं भवति। न चात्र व्युत्पत्तिव्यवहारविरोधः; तन्निमित्तविशिष्टस्यैव सर्वत्र प्रतीतेः। इतरथैव हि विरोध इत्युक्तम्। न चात्र भेदाभेदविरोधः; निमित्तनिष्ठत्वाद्भेदस्य, उद्देश्यगतत्वादेकत्वस्य।

एवं लोके व्युत्पत्तिव्यवहारयोर्विशिष्टविषयतया सामानाधिकरण्यस्य सुदृढं निरूढत्वाद्वेदेऽपि तत्तद्गुणविशिष्ट एव परमात्मा सत्यज्ञानादिवाक्यैस्सिद्ध्यतीति सर्वं समञ्जसम्।

इति श्रीभगवद्रामानुजमुनिवरमतधुरन्धरस्यात्रिगोत्रप्रदीपश्रीपद्मनाभार्यनन्दनस्य
वादिहंसनवाम्बुदस्य श्रीमद्रामानुजाचार्यस्य कृतिषु न्यायकुलिशे
सामानाधिकरण्यवादस्सप्तमः.

१. प्रधानशेषतयेत्यर्थः

श्रीः

॥ सत्कार्यवादोऽष्टमः ॥

श्रुतिरेवैकविज्ञानाद्वदन्ती सर्ववेदनम् ।
सत्कार्यवादं प्रस्तौति संस्थानं जातिमेव च ॥

तथाहि—'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातम्' इत्यादिश्रुतिभिरेकविज्ञानेन सर्वविज्ञानमुपदिश्यते । तच्च कथमित्यपेक्षायां 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादिभिरुपपाद्यते। तदवगच्छामः कारणद्रव्यमेवावस्थान्तरापन्नं कार्यद्रव्यमिति। कथमन्यथान्यज्ञानादन्यस्य विज्ञानं स्यात् ॥

तादात्म्ये वा कथं हेतुहेतुमद्भावः ? न हि घटज्ञानेन घटज्ञानमित्युच्यत इति चेत्, सत्यम्। न ह्यत्र कार्यकारणभावेन ते (द्वे ?) ज्ञाने उपदिश्येते; किन्त्वेकज्ञानेन सर्वं विषयीकृतं भवतीति। अत ओदनपाकं पचतीतिवत् प्रत्ययार्थ एव द्वितीयश्रुतविज्ञातादिशब्देन विवक्षित इति नेयम्। एकसर्वशब्दयोस्तु कार्यकारणावस्थाद्वयान्वितविषयत्वेना (त्वेन ना ?) धिकविषयत्वम् ।

ननु च कथं तर्हि कारणावस्थविज्ञानेन कार्यावस्थस्य विषयीकृतत्वम्। कार्यावस्थायास्तदगोचरत्वादिति चेत्, सत्यं नावस्थाविषयः; तथापि तस्य द्रव्यस्य ज्ञातत्वव्यपदेश इत्यदोषः। यथा हि तिष्ठतो देवदत्तस्य दर्शनेन गच्छतोऽपि दृष्टत्वव्यवहारः। अपूर्ववदेव देवदत्तो गच्छतीत्युक्ते हि प्रतिब्रवीति, 'दृष्ट एव पूर्वं तत्रासीनः' इति। एवमिहापि भवितुमर्हति । दर्शनान्तरेषु एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तवाक्यार्थसङ्गतिः **भाष्यकारपादैरेव** तत्र प्रपञ्चितत्वान्नेह प्रस्तूयते ॥

अत्रेदं विमर्शनीयम्—कथं कारणद्रव्यमेव कार्यतामनुभवतीति। तत्र हि केचिदाहुः—

कार्यं भिन्नमुपादानाद्बुद्धिशब्दान्तरादिभिः ।
अन्यथा हि प्रपञ्चोऽयं प्र(यमप्र ?) त्यक्षः प्रसज्यते ॥

तथाहि—न तावत्कारणमेव कार्यमित्यभ्युपगन्तुमुचितम्; बुद्धिभेदात्। स्वरूपभेदो हि बुद्धिभेदव्यवस्थाप्यः। स चोत्तभ्यते विरुद्धधर्माध्यासेन। अतो वक्ष्यमाणैर्धर्मभेदैरुत्तम्भितो बुद्धिभेदस्तावत्कार्यकारणद्रव्ययोस्स्वरूपभेदं व्यवस्थापयति। शब्दभेदादयश्च विरुद्धा धर्माः। तन्तवः पट इति शब्दभेदः। सूक्ष्मः स्थूल इति परिणामभेदः। बहवः एक इति सङ्ख्याभेदः। निम्नोन्नताद्यवयवसन्निवेशभावाभावात्मा आकारभेदः। आच्छादनादिसामर्थ्यासामर्थ्याभ्यां कार्यभेदः, शक्तिभेदश्च। कार्यस्य स एव; कारणस्य तु स चासश्चेति कालभेदः। एवमादयो विरुद्धा धर्मा नैकस्मिन्नेव कल्पन्ते ॥

यदि च प्रागपि कार्यद्रव्यं स्यात्, कारकव्यापारो निष्फलस्स्यात्।
नित्यानित्यविभागोऽपि न क्वचिद्द्रव्येषु स्यात्।

अथावस्थाभेदमाश्रित्यैतत्सर्वं समाधीयत इति मतम्, तन्न; विकल्पासहत्वात्। तथाहि—किमवस्थाभेदः कार्यकारणयोरनुगत एव, उतानियतः, किं वा कार्ये वा कारणे वा व्यवस्थित एव? नाद्यः कल्पः; द्रव्यस्वरूपवत्तस्यापि सत्तादिलक्षणस्याव्यवस्थापकत्वात्। किञ्चिद्व्यवस्थितं हि क्वचित्स्वानुवर्तिनमन्यमपि धर्मं व्यवस्थापयितुमीष्टे। अनुगतं हि नामान्वयेन व्यतिरेकेण वा धर्मान्तरविकल्पं प्रत्यप्रयोजकमेव। [१]अनियतस्य तु दूरे नियामकत्वम्। [२]नियतश्च स्वाभावसहायः पूर्वोक्तविरुद्धधर्मपक्षनिक्षेपमर्हति। न च कश्चिद्विरुद्धो धर्मस्तथाविधं धर्मान्तरमविरुद्धमापादयति। स्वयमविरुद्ध इति कथं नियतः? अविरोधो ह्युभयत्रान्वयदर्शनेन निर्वाह्यः; यथा शीतोष्णानुगतस्य द्रव्यत्वादेः।

१. द्वितीयं दूषयति—अनियतस्येति.
२. तृतीये आह—नियतश्चेति.

कश्चासौ[१]? यदि संयोगादिलक्षणोऽभ्युपगम्यते, कथमसौ प्रागपि विद्यमानः कार्यावस्थां नियच्छेत्। अथ तद्विशेषः, स किं लक्षणः येन कार्यं जायते? स एवेति चेन्न; कार्यासिद्धौ तदसिद्धिप्रसङ्गात्। ननु तथाप्यसावस्त्येव; इतरथान्योन्याश्रयापत्तेः। प्रत्यक्षश्च; संयोगजातीयत्वादिति चेत्, न; तथाप्येकत्वस्थूलत्वादीनामाश्रयान्तरमन्तरेणानिर्वाहात्। न हि संयोग एवाश्रयो युक्तः, गुणत्वात्। न च संयोगिनः; तेषामनेकत्वादस्थूलत्वाच्च। एकत्वानेकत्वयोः स्थूलत्वास्थूलत्वयोश्च [२]एवमविरोध इति चेत्, तर्हि किमाश्रयमन्तर्भाव्य कथ्यते[३]। तर्हि भेदाभेदवाद एवाङ्गीकृतस्स्यात्। अन्यथा ह्यनाश्रयस्य गुणस्यानवस्थानप्रसङ्गः[४]। अभेद एवाङ्गीकृत इति चेन्न; विरुद्धधर्माध्यासाद्भेदस्यापि दुरपह्नवत्वात्। न च क्वचिद्देशे तयोस्सामानाधिकरण्यं दृष्टम्; येनाविरोधोऽपि कथ्येत। किञ्च संयोगोपाधिकमेकत्वमिच्छतां क्वचिदपि साक्षादेकासिद्धेः, पुनरनेकासिद्धौ द्रव्याभावे गुणाद्यभावाच्च सर्वलोकापलापः प्रकारान्तरेणोपस्थित इति साधु भवता प्रपञ्चापलापः परिहृतो भवति। इदमेव साक्षादेकमिति चेत्, किमयं वाङ्मात्रेणोपचारश्श्रद्धास्यते। तर्हि नानात्वमेवौपचारिकमस्तु, एकत्वन्तु न हातुं शक्यमिति चेत्; अहो भवतां प्रपञ्चसत्यत्वाभिलाषमहिमा; यत्कारणमपहाय कार्यं तिष्ठापयिषन्ति।

किञ्च

> योग्यता सर्वभावानां यावदाश्रयभाविनी।
> अतः प्रत्यक्षताणूनां स्थूला प्रत्यक्षतापि वा ॥

शक्तिर्हि यावदाश्रयभाविनी कार्यानुगुणशक्तिवादिभिरुपेयते। स्थूलश्चार्थः प्रत्यक्ष ज्ञानजनक (नन?) शक्तस्तद्गोचरो भवति। स एव चेदणुभावेनापि वर्तते, कथं तदानीं

१. किञ्चासाववस्थाभेदः किंरूप इत्यर्थः.

२. कार्यत्वकारणत्वादिवदित्यर्थः.

३. आश्रयमन्तर्भाव्य कथ्यते किम्? इत्यन्वयः.

४. आश्रयरहितश्चेद् गुणोऽयं न तिष्ठेदित्यर्थः.

प्रत्यक्षो भवेत्। अणुत्वेन वा (?) वर्तमानानामशक्तिनिश्चयात्। तेषामेव[१] प्रत्यक्षे स्थूलत्वे प्रत्यक्षता न स्यात्। अथ स्थूलत्वमेव [२]सहकार्यसत्त्वादिविशिष्टस्यैव शक्तस्य द्रव्यस्य प्रत्यक्षतेति मतम्; किं तत् स्थूलत्वम्? किं महिमगुणशालित्वमेव वैशेषिकोक्तमुपक्र-(पग?) म्यापेक्षिकमनापेक्षिकं च महत्त्वम्, तर्हि परमाणुकारणत्वाद् द्व्यणुकादिप्रक्रियादीना मभ्युपगमप्रसङ्गः। अथापेक्षिकमेवानन्तम्, तर्ह्यतिसूक्ष्मेष्वप्रतिष्ठं प्रत्यक्षत्वं प्रसज्येत।

किञ्च योऽयं पृथिव्यादीनां द्रव्याणां परस्परभेदः, यश्च घटपटादीनामेवानन्तप्रकारः, स सर्वो भवतां न सिद्ध्येत्। उपादानादभिन्नस्योपादेयस्य मिथोऽपि भेदानुपपत्तेः; उपादाने च पृथिवीत्वादेस्तदुपयोगिनो भेदान्तरस्याभावात्। अस्ति नस्स्वरूपभेद इति चेन्न; घट-द्वयविलक्षणस्य घटपटभेदस्य तेनानिर्वाहात्। निर्वाहे वा कथं तेनैव स्वर्णेन रुचकस्वस्तिक-वर्धमानादिकार्योत्पादः क्रमेण सङ्गच्छते। किञ्च संस्थानमेव भवतां भेदः; तस्यैव जाति-रूपत्वात्, जात्यादेरेव भेदत्वात। अतो नानासंस्थानभाक्षु द्रव्येषु भवद्भिरेव भेदः कण्ठोक्त्या समर्पित इति किं तद्विरुद्धेन सत्कार्यवादग्रहणेन। किञ्च कार्यद्रव्यं भूत्वा (अभूत्वा;[३]) भवतीति सर्वलोकप्रसिद्धम्। अवस्थादृष्टान्तोऽर्थानुमानेनापि सिद्धमिति[४] किमर्धजरतीन्या-येन। न च साङ्ख्यवत्सर्वं कार्यं सदेवोत्पद्यत इति भवतामभ्युपगमः। न चोपादाननिय-मादिसाङ्ख्योक्तहेतुजालावलम्बनमस्ति; अवस्थास्वसत्कार्यवादसमर्थनाय तेषां प्रत्युक्तत्वात। अतो वरं स एव[५] द्रव्येष्वाश्रितः। किन्तरां सत्कार्यवादक्लेशेनेति।

१. अणूनामेव प्रत्यक्षमिति स्वीकारे स्थूलत्वे कथं प्रत्यक्षमिति भावः.

२. स्थूलत्वं सहकारीकृत्येत्यर्थः। सत्त्वमर्थक्रियाकारित्वम्। सत्त्वाद्विशिष्टस्येति पा०.

३. अभूत्वा भवतीति पाठो युक्तः न्यायभाष्याद्यनुसारी च; पूर्वमस्थित्वा पश्चाद्भवतीत्यर्थः.

४. अर्थानुमानेऽपि सिद्ध इति पा०.

अवस्थादृष्टान्तोऽस्यानुमानेऽपि सिद्ध इति पाठस्स्यात्। सिद्धमिति पाठे कार्यद्रव्यस्याभूत्वा भवनं न केवलं सर्वलोकप्रसिद्धम्। किन्तु अवस्थादृष्टान्तोत्थानुमानेनापि सिद्धमिति भावानुगुणं भावनीयम्.

५. अवस्थायामङ्गीकृतस्स एवासत्कार्यवादः द्रव्येष्वेवास्त्विति ॥

अत्रोच्यते—

कार्यकारणयोरैक्यं प्रत्यभिज्ञानतस्स्थिरम् ।
विरुद्धधर्मसम्बन्धो व्यवस्थाभेदबन्धनः ॥

पश्यामो हि वयं तदेव मृत्तन्त्वादिद्रव्यं संस्थानान्तरमासाद्य घटपटादिभावमनुभवतीति। तत्र यदुक्तं स्वरूपभेदो बुद्धिभेदेन सिद्ध्यतीति; तत्रासिद्धो बुद्धिभेदः। प्रत्युताभेदस्यैवोक्ताकारया बुद्ध्या साधितत्वात्। ततश्च न विरुद्धधर्माध्यासादिभिरुत्तम्भयितुं कल्पयितुं वा शक्यते। ननु उपादानानुवृत्तिरेव दृश्यते; न तु कार्यस्य प्रागपि सत्तेति चेन्न; तस्यैव द्रव्यस्यावस्थान्तरप्राप्तिरिति प्रतीतेः। न हि तस्मिन्ननुवर्तमाने द्रव्यान्तरं समस्तीति प्रत्येति। अत एव समानाधिकरणप्रत्ययोपपत्तिः। इतरथा ह्युपादानोपादेययोर्व्यधिकरणप्रत्ययो भवेत्। कथं च भवता दुग्धादिभिर्दध्यादिष्वारभ्यमाणेषु प्रत्ययानुवृत्तिस्स्यात्। न हि तत्रावयवागमो दृश्यते; दुग्धावयविनस्तदवयवानां वा दध्यनारम्भकत्वाभ्युपगमात्। परमाणूनां दुग्धदधिजातीयानामप्रत्यक्षत्वात्। दध्यवयवानां च पूर्वमसत्त्वात्। अत एव भ्रान्तिरसाविति चेन्न; निर्बाधत्वात्। तन्तुपटादिभ्यो विशेषाभावात्। अतः प्रत्यक्षमेव निरपेक्षमेवमादिषूदाहरण सहस्रेषु कार्यकारणयोरवस्थाभेद एव न द्रव्यभेद इति व्यवस्थापयति। एवं स्थिते कयानुपपत्त्या द्रव्यान्तरमध्यवस्येम। विरुद्धधर्माध्यासोऽप्यवस्थाभेदात्सङ्गच्छते। सा चावस्था संयोगादिलक्षणा प्रत्यक्षसिद्धा। तत्र यत्तावदुक्तं, नियतस्तु विरुद्धधर्मान्तरमेवेति; स्यादेतदेवं, यदि धर्म (र्मि ?) द्वयनिष्ठतया स्वयं स्वाभावश्च प्रतीयेयाताम्। एकधर्मिण्येव कदाचित्स्वयमुत्पद्यत इति सर्वैरवसितत्वात्। संयोगो ह्यसमवायितया[1] भवद्भिरपीष्यमाणस्तन्त्वादिष्वेव समुपजायते, नार्थान्तरे। स तु स्वाधिकरणे स्वाधीनधर्मान्तरमपि व्यवस्थापयतीति किं नोपपद्यते।

कथमेकत्वं बहुषु व्यवस्थापयेदिति चेत्, तत्किमेकत्वबहुत्वयोर्निरुपाधिकयोर्विरोधः, उतोपाधिभेदापादितयोरपि ? न प्रथमः; बहुषु प्रत्येकमेकत्वाभावप्रसङ्गात्। न द्वितीयः;

१. असमवायिकारणतयेत्यर्थः।

संयोगविशेषस्यैवोपाधित्वात्। न चैवमौपाधिकत्वे स्वाभाविकैकत्वालाभः; अस्यैव स्वाभाविकत्वात्। हेतुरेव ह्यत्रोपाधिरिति गीयते। तच्च..............................

[1]स्थितावप्यपेक्षितम्। तदपाये ह्येकत्वं नश्यति। एतावानत्रावयोर्विशेषः—संयोगादसमवायिकारणाद्द्रव्यं जायते, अस्मादेकत्वं त्वन्मते। अस्माकं तु संयोगादेव संयोगिष्वेकत्वमिति। न चैवं भेदाभेदप्रसङ्गः; समवायिद्रव्यातिरिक्तस्य द्रव्यान्तरस्य प्रसङ्गाभावात्।

एतेन स्थूलत्वं व्याख्यातम्। पिठरपाकवादिनां परिमाणद्वयस्यैकाधिकरणत्वं कालभेदेन तत्तदुपाधितो निरुह्यत एव। तत्र चोपाधिभेदेनेति न विशेषः; दृष्टत्वादेव हि तत्राप्यविरोधः।

यत्तु विरुद्धधर्माध्यासाद्भेदोऽपि दुर्वार इति; तत्रासिद्धिः; विरोधाभावस्योक्तत्वात्। एतेन च साक्षादेकत्वासिद्धिः प्रत्युक्ता। न चान्यगतमेकत्वमन्यत्रोपचर्यते। न च नानात्वमपि साक्षान्नास्ति। यथा हि प्रत्येकमेकत्वेऽपि तेषामेवापेक्षाबुद्धिगृहीतानां तेन रूपेण बहुत्वाधारत्वम्, एवमपेक्षाबुद्धिगृहीतानां बहुत्वेऽपि तामपहाय संसर्गगृहीतानामेकत्वमेवेति सांदृष्टिकमेतत्। स्वातन्त्र्ये चापेक्षाबुद्धिरात्मानं लभते। संयोगविशेषस्तु स्वातन्त्र्यं विरुणद्धि। अत एव हि कथञ्चित्स्वारसिकं न लभ्यते नानात्वम्। न चेतः पर[2] किञ्चिदेकत्वं क्वचिद्दृष्टम्, यदलाभादलोपचारं मनुषे। अतो न प्रपञ्चापलापप्रसङ्गः॥

यच्चापरमुक्तं योग्यता यावदाश्रयभाविनीति, तत्र कार्यप्रतिसम्बन्धिनि कारणे योग्यतेत्यविवादम्। तत्र यावत्कारणमस्ति, तावद्योग्यतापि स्यात्। कारणं चावस्थितमेव द्रव्यं न केवलम्। तत्रावस्थाः द्रव्यस्वरूपव्यपदेशहेतवः। तास्संस्थानं जातिरिति चापदिश्यन्ते। न हि केवलस्य द्रव्यस्य व्यपदेशो भवति। द्रव्यमित्यपि गुणाश्रयत्वोपाधिको व्यपदेशः। जात्यवस्थितस्यैव द्रव्यस्य तदवस्थानिबन्धनान्वयव्यतिरेकाभ्यां कारणत्वनिश्चयः। तथा निश्चितस्यैव

१. तच्चेत्यनन्तरं स्थिताविल्यतः पूर्वं किञ्चिद्गलितमित्यालोच्यते। परन्तु क्वचित् तत्सूचकान्तराळकल्पनमन्यत्रेवेह न लक्ष्यते। तदत्र यदि किञ्चिदस्ति, तर्हि अवयविस्थितावपीति रीत्या चिन्तनीयम्॥

२. अन्यदित्यर्थः.

सहकारित्वेन संयोगादिः प्रतिपत्तिमवतरति। संयोगरूपरसादयो हि गुणास्स्वेनैव रूपेण कार्यकारणभावादिकमनुभवन्ति। तथा च यस्य येन रूपेण कारणत्वं निश्चायते, तस्य यावदाश्रयभाविनी शक्तिरित्युक्ते सति, न परमसूक्ष्माणां प्रत्यक्षता परमस्थूलानां वा तन्निवृत्तिरापादयितुं शक्यते। किं वावस्थाव्यतिरेकेण द्रव्यमेव तत्तत्कार्यशक्तमस्तु; अवस्थाभिरनुगृह्यताम्। नापि (तथापि?) नातिसूक्ष्मप्रत्यक्षतापत्तिः; अपेक्षितमहत्त्वविशेषस्यैव यथादर्शनं सहकारित्वोपपत्तेः। तद्विशेषाश्च स्वत एव परस्परतो व्यावृत्ताः कार्यदर्शनानुगुण्येन सहकारितां प्रतिपत्स्यन्ते॥

एतेन भेदासिद्धिः प्रत्युक्ता। अवस्थाभेदनिबन्धनस्य द्रव्यभेदस्य विशिष्टगाचरस्य विशेष्यद्रव्याभेदेऽपि सिद्धेः। यत्र हि विशेष्यानुवृत्तिः स्फुटतरमवसीयते, तत्रापि विशेषणभेदाद्विशिष्टभेदः प्रतिलभ्यते। यत्र त्वाकाशादिषु विशेष्यस्य द्रव्यस्य धर्मान्तरवत्तया स्फुटतरानुवृत्तिप्रत्ययाभावः, तत्रावस्थाभेदनिबन्धनद्रव्यभेद एवावसातुं शक्यते। नैतावता अवस्थातिरिक्तद्रव्यापलापप्रसङ्गः; दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिभिर्गुणगुणिभेदप्रतिपादकैस्तत्सिद्धेः। अतः स्थानभेदव्युत्पादनमप्यनवद्यम्; कार्यकारणयोरेव द्रव्ययो स्तथाविधस्य भेदस्येष्टत्वात्। न चैवं भेदाभेदप्रसङ्गोऽपि; अनन्यापेक्षयोरेकत्रानभ्युपगमात्। यद्यपि परैर्व्यक्तिद्वये कार्यद्वये वा जात्यात्मना कारणात्मना चा[१] भेदः, व्यक्त्यात्मना कार्यात्मना च भेद इत्युपाधिरप्यङ्गीकृतः। तथापि तैर्जातिव्यक्त्योः कार्यकारणयोश्च निरुपाधिकौ भेदाभेदौ साक्षादभ्युपगम्येते। न चैवं क्वचिदस्माकमस्त्यभ्युपगमः; संस्थानतद्वतोस्संस्थानयोश्चात्यन्तभेदात्। तदाश्रयद्रव्यस्य चात्यन्ताभेदात्। तस्य तु विशिष्टाकारेण भेद इत्यत्र न कश्चिद्विरोधः। संस्थानस्थैर्यनिबन्धनो द्रव्यस्थिरत्वव्यपदेशः। आत्मादिषु तन्नित्यत्वनिबन्धनो नित्यत्वव्यपदेशः। अचेतनेषु प्रकृतिद्रव्ये द्रव्यस्वरूपनिबन्धनं (नः?)। कालेऽपि कार्यकारणात्मनि प्रकृतिवदेवेति न नित्यानित्यविभागाभावोऽपि॥

१. वा इति पा०.

न च केवलं सङ्कल्पमात्रेण सर्वमिदं सङ्गिरामहे, येन सर्वत्र सत्कार्यवादो विपर्ययो वा स्वीकर्तुमुचित इति पर्यनुयो (यु ?) ज्येमहि। प्रमाणशरणास्तु[१]—प्रमाणन्तु प्रत्यभिज्ञानमचेतनमेवानुवृत्तं गोचरयति; नावस्थावद्भेदम्। अतः कस्यायमुपालम्भः? यदि च नैवं कारणकार्यद्रव्यस्वरूपनित्यत्वावस्थाभेदानभ्युपगच्छेम, कथं तर्ह्यमूर्तानां महदहङ्कारतन्मात्राकाशादीनामुत्पत्तिमुपपादयेम? न हि तत्रावयवसंयोगादवयविनोऽर्थान्तरस्यासत उत्पत्तिश्शक्या वक्तुम्। न च तेषामनुत्पत्तिरेव; श्रुतिसिद्धत्वात्तदुत्पत्तेः। सावयवेषु भूतेषु च भूतान्तरप्रकृतिकत्ववादस्त्वदुक्तावयवाधीनावयविनिष्पत्तिं प्रतिक्षिपति। न चासां श्रुतीनामर्थापहारस्तर्कविरोधो वा शक्यः कल्पयितुम्; प्रमाणविरोधे तर्कस्याभासस्थितेः।

ननु च 'आकाशाद्वायुः' इति च श्रूयते। तत्राकाशैकदेशस्य वाय्वात्मना परिणतस्य क्रियासमवायात्पूर्वदेशप्रहाणाप्रहाणविकल्पानुपपत्तिः। तथा च (हि ?)—प्रहाणं तावद्दुर्घटम्; हेयस्य देशस्याभावात्। भावे चाकाशस्यैव वायुतानुपपत्तिः। न हि तदेवाकाशादिकारणपरम्परावस्थितद्रव्यं वायुतावस्थां प्राप्य देशान्तरं गतमपि तत्रैव यथावस्थितमिति सम्भवति। आकाश एव कुत्र तिष्ठतीति तद्देशविमर्शे यद्यपि स्वपरनिर्वाहकत्वाद्देशान्तरनिर्देश उपपद्यते, तथापि विभागस्य स्वात्मन्यनुपपत्तेर्देशान्तरापेक्षा विद्यत एव। अत आकाशातिरिक्तदेशकल्पनापि स्यात्। किञ्च तस्मिन्देशे सच्छिद्रता स्यात्। न (नि ?) छिद्रत्वं हि सलिलराशिवदुद्धृतविवरपूरणेनेति, तर्हि सक्रियत्वप्रसङ्गः। तच्चायुक्तम्; विभुत्वात्प्रकृतेः। अप्रहाणमपि दुर्घटम्; देशान्तरसञ्चारिणो वायोरेव समवायदेशे निष्कम्पावस्थानविरोधात्। निष्क्रियत्वसक्रियत्वयोरेकत्र विरोधात्। सक्रियस्य पूर्वदेशाविभागे क्रियास्वभावविरोधात्; पूर्वदेशविभागपूर्वकदेशान्तरसंयोगजननस्वाभाव्यात्तस्याः।

अत्रोच्यते—

श्रुतेस्तु शब्दमूलत्वादिति सूत्रकृता स्वयम्।
एवामाद्यनुयोगानामुत्तरं प्रतिपादितम्॥

१. सर्वमिदं सङ्गिरामह इत्यनुवर्तते.

श्रुत्या प्रमाणभूतया योऽर्थः प्रतिपादितः, तदन्यथानुपपत्त्या कल्प्यतां काममर्थान्तरम्, अर्थापत्तिश्चेत्प्रबला। नो चेत् पर्यनुयोग एव नास्ति, अन्यथाप्युपपन्नत्वात्। विरोधोऽपि यथासंभवं सामानाधिकरण्येन प्रमाणसिद्धेषु निरवकाशः। न च वस्त्वन्तरसाधर्म्यादनुमानं प्रसरति वैधर्म्यादिति .... [1]सम्बन्धिनस्सर्वाकाशदेशसम्बन्धेऽनुपाधित्वाच्च। अमूर्तस्य तु सर्वगतस्य पूर्ववन्निरंशत्वादेवाद्रव्यस्य च संयोगस्यानुपाधित्वात्। अन्यसमवेतस्य वा सम्बन्धात्। अतोऽनवयवत्वासिद्धेस्सावयवस्य एकदेशविकारोपपत्तिः। उत्तरयोस्तु कल्पयोर्व्याप्तिविरहः। अस्पर्शस्यारम्भकान्तररहितस्यापि स्वाभाविकदेशभेदाश्रयणेन संयोगवत्कार्यान्तरस्यापि व्यवस्थोपपत्तेः। यथा चावयवा एवावयविनः प्रादेशिकसंयोगादिव्यवस्थापकाः। न ह्यवयवान्तराणि सन्ति। न चावयवसमवायमन्तरेणावयविनि साक्षात् संयोगान्तरसमवायस्त्वयाभ्युपगम्यते। संयोगान्तरस्यापि त्ववयवा एव प्रदेशव्यवस्थापकाः। न हस्तपुस्तकसंयोगाज्जायमानो देवदत्तपुस्तकसंयोगश्चरणादिदेशे दृश्यते। एवमारभ्यमाणाः कार्यभेदा एवारम्भकदेशासङ्करकारिण इति किं नोपपद्यते। आरभ्यमाणसिद्ध्युत्तरकालं तेषामुपाधित्वं पूर्वमेव देशविभागोऽपेक्षित इति चेन्न; समवायवदुपपत्तेः। यथा हि—अवयवेष्ववयविसमवायो न कार्त्स्न्येन। व्यासङ्गस्तु[2] भागसिद्धेः पश्चादेव। भागसिद्धिश्च समवायापेक्षेति परस्पराश्रयत्वेऽपि तैरेव भागैस्तुल्यकालमेव वृत्तिविशेषसिद्धिः, तथा तैरेव कार्यैस्तत्प्रदेशभेदसिद्धिः। न च वृत्त्यन्तरत्वादवयववृत्तेर्न भागापेक्षेति वाच्यम्; परिणामान्तरत्वादत्राप्येकदेशादिविकल्पानवसरप्रसङ्गात्। एतत्सर्वमुत्तरं वैभवादुक्तमस्माभिः। पूर्वोक्त एव स्वाभाविकदेशभेदः पारमार्थिक इत्यनुसंधेयम्। एतेन द्रव्यस्य सर्वस्य स्वाभाविकभेदोपपादनेन निरवयवाः .... न च धर्मिग्राहकप्रमाणविरोधः, अवयविभागज .... [व्य] क्तिपर्यवसानभूमेस्सूक्ष्मस्य वस्तुनस्सिद्धत्वात्। ते .... त् प्रदेशभेदा एव हि स्पर्शवायूनामवयवाः। न च तस्य स्वतः प्रदेशभेदा न सन्तीति वाच्यम्; दिक् संयोग .... [भेदबलेन तत्सिद्धेः, न च दि] गुपाधि-

१. अत्र गलितत्वादनन्वितमिव लक्ष्यते।

२. व्यासङ्गः विभज्य समन्तात् सम्बन्धः—व्यासज्यवृत्तित्वम्।

कदेशभेदादेव संयोगभेदसिद्धिः ; परस्पराश्रयप्रसङ्गात्। एकदिक्संयोगग्रस्ताखण्डस्वरू .... रात् विनाच दिक्सम्बन्धात् प्रदेशभेदासिद्धेः। अतो द्व्यणुकस्यावयवसंयोगादिना द्व्यणुकान्तर .... पक्षीणावयवत्वे द्व्यणुकान्तरसंयोगालाभात् त्रसरेणु निष्पत्तौ विश्वसिद्धिरपि त्वत्पक्ष एव प्रा .... गोचरं ज्ञानमात्रं दृष्टान्त इति .... न्वे संयोगवत् प्रदेशभेदानपेक्षणात्। व्यवहारयोग्यतालक्षणस्वभावविशेषात्मक .... सर्वप्रतियोगिकमेव। तथापि तस्य सङ्कोचकैः कर्मभिः प्रतिबद्धत्वात् संसारिषु तारतम्य .... हि तत्त्वविदां प्रक्रिया। अतो मूर्तं सर्वं सावयवं द्रव्यं च सर्वं संशयं न .... रुणद्धि। एतेन यत्परैरुक्तं भूतेष्वेकमेवैकस्यारम्भकं न द्वाभ्यां त्रिभिश्चतुर्भिर्वा .... तः अनुग्राहकत्वमेवेतरेषामिति, तदपि प्रत्युक्तम्। अर्थान्तर-स्यावयविसंज्ञस्य तत्स .... [मुदायेना] रम्भे हि तदवकाश इति ॥

इति श्रीभगवद्रामानुजमुनिवरमतधुरंधरस्यात्रिगोत्रप्रदीप-

श्रीपद्मनाभार्यनन्दनस्य वादिहंसनवाम्बुदस्य

श्रीमद्रामानुजार्यस्य कृतिषु

न्यायकुलिशे

सत्कार्यवादोऽष्टमः ॥

University Notes

VICE-CHANCELLOR

His Excellency the Governor of Madras has been pleased to nominate the Rt. Hon'ble V. S. Srinivasa Sastriar, our Vice-Chancellor, as a member of the Madras Legislative Council.

* * * * *

We congratulate Diwan Bahadur S. E. Runganadham, M.A., M.L.C., our Ex-Vice-Chancellor, on his appointment as Vice-Chancellor of the Madras University.

* * * * *

The Degree of Doctor of Science was conferred by the London University on Dr. S. Ramachandra Rao, M.A., PH.D., Professor of Physics. We congratulate him on the well-merited honour.

* * * * *

Dr. B. V. Narayanaswamy Naidu, Professor of Economics, has been elected Honorary General Secretary and Treasurer of the Indian Economic Association. He has also been elected as Associate Editor of the Indian Journal of Economics.

* * * * *

COURSES OF STUDIES

The syllabus in Chemistry for the Intermediate Examination was revised and made more definite. In the scheme of examination separate marks were alloted to laboratory record note-books in Physics and in Chemistry as in Botany and Zoology.

* * * * *

The English Honours course was reorganised with a view to giving greater importance to Literature. The new course will come into effect from July 1937.

* * * * *

PUBLICATIONS

The Syndicate has sanctioned the publication of the following works :

1. A Monograph on Jagannatha Pandita by V. A. Ramaswamy Sastry, M.A., Lecturer in Samskrit.

2. Philosophy of Aesthetic Pleasure by P. Panchapakesa Sastry, Pandit in Samskrit.

3. Trimsacchloki.

*   *   *   *   *

BUILDINGS

The following buildings are nearing completion :—

1. Administrative Buildings and Convocation Hall.
2. Music College.
3. Guests' Quarters.
4. New Hostel Buildings.

*   *   *   *   *

Reviews

Svarasiddhānta Candrikā.—By Śrīnivāsayajvan edited by Mr. K. A. Sivaramakrishna Sastriar of the Department of Sanskrit, Annamalai University. Price Rs. 5.

Svarasiddhānta Candrikā is the work of Śrīnivāsayajvan, the disciple of Rāmabhadra Dīkṣita, the famous *Vyākaraṇācārya* of the Tanjore District in the latter half of the 17th and the former half of the 18th centuries. The author clearly exhibits his thorough mastery of the Taittirīya śākhā of the Yajurveda with Bhaṭṭa Bhāskara bhāṣya and all the works on Sanskrit grammar available in his time. He combines with his scholarship, a keen critical acumen and a dispassionate attitude in his discussion, which are indispensably necessary for those engaged in research. Wherever he differs from another, he frankly gives expression to it, whether he is the *Sūtrakāra,*[1] *Vārtikakāra,*[2] *Mahābhāṣyakāra,*[3] *Haradatta,*[4] *Svaramañjarīkāra, Parimalakāra* or *Bhaṭṭoji Dikṣita.* He himself states at the commencement that, since many mistakes were found in the *Svaramañjarī,* he felt the necessity to write this work. In the body of the book he condemns, sometimes vehemently, not only *Svaramañjarīkāra,* but also the author of its commentary, the *Parimala.* The *Parimala* was the work of Girinātha, the son of the famous commentator Mallinātha (14th c.) and pupil of Nṛsimha, the author of the *Svaramañjarī.* He also condemns on many an occasion the views of the *Vedabhāṣyakṛt.* This *Vedabhāṣyakṛt* seems to be Bhaṭṭabhāskara and not Sāyaṇa, since many of the statements here are direct quotations from the Bhāṣya of the former or the summary of his views there. His lucid exposition of the different theories and the discussion thereon under तस्यादित उदात्तमर्धह्रस्वम् (Pp. 9-13), उदात्तस्वरितपरस्य सन्नतरः (P. 50) गतिकारकोपपदात्कृत् (P. 180), एकश्रुति दूरात्सम्बुद्धौ (P. 371), विभाषा छन्दसि (pp. 379-382) are very fine. Whenever he condemns Haradatta, Nṛsimha or Bhaṭṭoji Dikṣita, he quotes for his

1. बहुलग्रहणस्य चिन्त्यं फलम् (p. 93);; इतिकरणस्य फलं चिन्त्यम (p. 341)
2. तेन परादिश्च...इत्यादि सिद्धम् (p. 171)
3. भाष्ये...न तु अस्य वस्तुतः कार्यकालत्वम् (3. 357)
4. हरदत्तादिमते...चिन्त्यम् (pp. 85-86)

authority the *Mahābhāṣya*. In two or three instances he states, in support of his views, the views of Cokkanātha Makhin, the author of the *Bhāṣyaratnāvalī* and his *prācārya*. In two places he gives the views of his own *ācārya* Rāmabhadra Dikṣita.

The plan of this work was not newly conceived by him, but it is only an improvement on that adopted by Bhattoji Dīkṣita in his *Siddhānta-kaumudī*, on the model of the early part of the same work. In a few of the sutras, he adopts a reading different from that adopted by Bhaṭṭoji Dikṣita, takes उदाराश्वेषु क्षेपे as one sūtra on the strength of the *Mahābhāṣya*, though it is taken as two by Bhaṭṭoji and mentions वा भाषायाम् (p. 265) which is not found in Bhaṭṭoji's work. The examples cited here from *Bhāṣā* are generally the same as given by Bhaṭṭoji; while those from the Vedas are taken here from the Taittirīya ṣākhā; but even there if the passage given by Bhaṭṭoji finds a place both in the Ṛgveda and the Yajurveda, he always prefers to give it.[5]

The sentence अलाबूशब्दोऽपि...अनुदात्तः इति (P. 61, *ll*. 12 & 13) and इति (p. 37, ll. 9 and 13) do not seem to fit in well.

Brahmasri K. A. Sivaramakrishna Sastriar, being an *adhītaveda* and *Vāiyākaraṇa* like the author, is well qualified to edit this work. He has done full justice to his qualifications. The printed book, as it stands now, clearly shows how much pains he should have taken to edit it. In the *upodghāta* he lucidly and briefly mentions the benefits of language, proves the priority of the Prātiśākhyas to *Aṣṭādhyāyī*, gives a general description of *Svara* from all sources and proves that Ācārya Pāṇini also might have thought of *svarita* to have had a higher pitch than *udātta*. He then gives four reasons for the *ēkaśruti* to have come in vogue in later Sanskrit. One of them is the use of *śleṣa* by poets. Would it not have been possible to read the same *śloka* with different tones? Another is the composition of Purāṇas for the sake of *women* and *śūdras*. Is it not said that the *Rāmāyaṇa* was sung? What would have been the harm if the Purāṇas also were sung in the same manner? It seems to me that *ekaśruti* came in vogue outside the sacrifices only after Sanskrit ceased to be the spoken language. Mr. Sastriar adds at the end of the upodghāta a short note on the life of the author, and the method of his treatment. Punctuation in certain places in the body of the book may have been more carefully attended to. For in-

5. इन्द्रेवो वामुशन्ति हि (p. 338) अग्निर्मूर्धा दिवः ककुत्पतिः (p. 373)

stance, the statement containing the *sādhya* may not be separated from that containing the *hētu* by the mark " । ".* A comma may have been used instead, as he has done in other places.

At the end of the book the editor gives the index of the *svara* sūtras of the *Aṣṭādhyāyī* and the phiṭ sūtras, and the vedic quotations, the list of authors and works quoted and corrigenda. It is quite clear that he has taken great pains to prepare them. Still in the bibliography he has failed to mention याज्ञवल्क्यस्मृति (noted in p. 331). Some of the errors have escaped his notice and hence do not find a place in the corrigenda.[6] The Sanskrit world is much indebted to the authorities of the Annamalai University in having enabled Mr. Sastriar to edit this work, to Mr. Sastriar for having critically edited it and to the Madras Law Journal Press for the neat execution of the work.

* Cf. p. 36, l. 8 ; p. 115, l. 4. etc.

(6) इकार (for अकार) in p. 107 l. 11; पर्यालोन (32, 21) परिमाषात्वे (35, 4), विभकत्युदात्तस्वं (36, 8), सर्वानुदात्तांयम् (36, 17), पर्याय for . पर्यायौ (48, 18) (cf. 372, l. 6) असिद्धस्वेऽपि (91, 1) अणप्रयय: (112, 17), क्रौञ्चायना: (129, 20) पूवाद्ब्रेञ: (199, 16), गतिकरको (206, 11) पष्ठया: (222,17) नियामसास्ति (250, 21), प्रम्नोतीति (355,11), प्रयस्लात् (354,6), आरम्म: (357, 19)